वर्षम् – ७१
अङ्कः – ७,८
वैशाख–ज्येष्ठ–मासौ
विक्रमाब्दः २०७८
युगाब्दः ५१२३
मई, जून, २०२१


ISSN 2249-698X

# भारती

## संस्कृत-मासपत्रिका

एकस्याः प्रतेः १५/–
वार्षिक–शुल्कम्
१५०/–
पञ्चवार्षिकशुल्कम्
७००/–
आजीवनसदस्यता
(१५ वर्षाणि)
२१००/–

प्रकाशन प्रत्येक माह की 1 तारीख



वैशाखी पूर्णिमा देशे प्रोच्यते बुद्धपूर्णिमा ।
पूज्यते भगवान् बुद्धः सश्रद्धं जगतीतले।।

## विषय-सूची


| क्र.सं. | विषयाः | निबन्धकाराः | पृष्ठ-संख्या |
|---|---|---|---|
| १ | सम्पादकीयम् | प्रोफेसर श्रीकृष्णशर्मा | ४ |
| २ | काव्य-गुणाः | प्रोफेसर सुरेन्द्रकुमारशर्मा | ५ |
| ३ | आत्मबोधार्थं मोक्षसाधनवर्णनम् | युगलकिशोरभारद्वाजः | १३ |
| ४ | योगः कर्मसु कौशलम् | डॉ. नानूरामजाटः | १५ |
| ५ | विनायकसहस्रसिद्धे | पं. राजेन्द्रमोहनशर्मा | १८ |
| ६ | सूक्ति-सुधा | डॉ. प्रेमचन्द्र रांवका | १९ |
| ७ | प्राकृतव्याकरणेषु संस्कृतव्याकरणस्य प्रभावः | आभा जैनः | २० |
| ८ | एकस्मिन् क्षणे | प्रो. डॉ. मधुसूदनः म. व्यासः | २४ |
| ९ | आध्यात्मिकसुभाषितानि | डा. नाथूलालसुमनः | २५ |
| १० | पुस्तकसमीक्षा | म.म. देवर्षिकलानाथशास्त्री | २६ |
| ११ | श्रीनटराज-शिवाष्टकम् | पं. नथमलशास्त्री दाधीचः | २७ |
| १२ | नारी-स्तम्भः | डॉ. राजेश्वरी भट्टः | २८ |
| १३ | मनुष्यः | प्रो. डॉ. मधुसूदनः म. व्यासः | ३० |
| १४ | आयुर्वेद-स्तम्भः | प्रो. बनवारीलालगौडः | ३१ |


### पाठकेभ्यो निवेदनम्

संस्कृतसुधियः पाठकाः निवेद्यन्ते यद् भारत्यां प्रकाशिताः शोधलेखाः, सामयिकनिबन्धाः, कविताः, कथाः, विनोदवार्ताः, लघुनाट्यकृत्यादयो भवद्भ्यः कथं रोचन्ते ? स्वविचारयुक्तपत्राणि निम्नलिखितसङ्केतोपरि संप्रेष्यानुगृह्णन्तु– **सम्पादक, 'भारती' संस्कृतमासिक, भारतीभवन, बी–15, न्यू कॉलोनी, जयपुर–302001**

**दूरभाषः** 0141–2379014, **मो.** 9783105699

**(धनादेश/चैक/ड्राफ्ट केवल ''भारती'' के नाम से ही भेजें– प्रबन्ध सम्पादक)**

ISSN2249-698X

।। श्रीशः ।।

# भारती

## संस्कृत-मासपत्रिका

संस्थापकौ

स्व. उमाकान्तकेशव आप्टे ( बाबा साहब आप्टे )

स्व. श्रीगिरिराजशास्त्री ( दादाभाई )

संरक्षकाः

श्रीश्यामशरणदेवाचार्यः

( निम्बार्कपीठं सलेमाबादः )

स्वामी रामभद्राचार्यः

( चित्रकूटः )

स्वामी अवधेशानन्दगिरिः

( हरिद्वारम् )

महन्तः गोविन्ददेवगिरिः

( पुणे )

स्वामी राघवाचार्यवेदान्ती

( अग्रपीठं रेवासा )

स्वामी संवित् सोमगिरिः

( बीकानेरम् )

महन्तः प्रतापपुरी

( तारातरामठं बाडमेरम् )

श्रीदामोदरदासमोदी ( जयपुरम् )

सम्पादकमण्डलम्

प्रधानसम्पादकः

देवर्षिकलानाथशास्त्री

सम्पादकः

प्रोफेसर श्रीकृष्णशर्मा

प्रबन्धसम्पादकः

सुदामा शर्मा

सहसम्पादकौ

प्रोफेसर सुरेन्द्रकुमारशर्मा

शिवशरणनाथत्रिपाठी

सहायकसम्पादकः

डॉ. स्नेहलता शर्मा

भारतीयसंस्कृतप्रचारसंस्थानम्

अध्यक्षः

प्रोफेसर शङ्करप्रसादशुक्लः

उपाध्यक्षौ

डॉ. नाथूलालसुमनः

डॉ. नन्दसिंहनरूकाः

सचिवः

डॉ. सुधीरकुमारशर्मा

सहसचिवः

कृष्णकुमारशर्मा

व्यवस्थापकः

राजीवदाधीचः

9352030291

कार्यालयः

बी-15, भारतीभवनम्

न्यू कॉलोनी, जयपुरम् ( राज. )

ई-मेल sanskritbharti09@gmail.com

वेबसाईट : www.bhartipatrika.org

वर्षम् 71 अङ्कः -7, 8

वैशाख-ज्येष्ठ-मासौ

विक्रमाब्दः 2078

युगाब्दः 5123

मई-जून, 2021

एकस्याः प्रतेः 15/-

वार्षिकशुल्कम् 150/-

पञ्चवार्षिकशुल्कम् 700/-

आजीवनसदस्यताशुल्कम् 2100/- ( 15 वर्षाणि )

सम्पादकीयम्

# प्रज्ञापराधाद् भेतव्यम्

...✍ प्रोफेसर श्रीकृष्णशर्मा

सम्प्रति जगदखिलं प्रायेण सार्द्धवर्षाद् 'कोरोना' महामार्या सन्ताडितं वर्तते। मध्ये मध्ये मन्दीभूतापि महामारी पुनरकस्मादुग्ररूपा जायते। अप्रैल-मई, 2021 मासयोः पूर्वतोऽपि प्रचण्डस्वरूपा सती जनान् सम्मर्दयति। न काऽपि चिकित्साजगति सुदृढा इदमित्थतया चिकित्सा श्रूयते। रोगप्रतिरोधकक्षमताभिवर्धनाय 'टीकाकरणम्' एव (Vaccination) शरणम्प्रतिभाति। भारतवर्षेऽपि टीकाद्वयं 'कोवैक्सीन' 'कोविशील्ड' नामभ्यां वैज्ञानिकानां महता श्रमेण यथाकालं त्वरितगत्या आविष्कृतमासीत्। इतः पूर्वन्तु नैकदशकेषु टीकाद्रव्याणां (Vaccines) महता विलम्बेन सम्प्राप्तिर्भवतिस्म। एतदर्थमस्माकं प्रधान-मन्त्रिणा समुत्साहं प्रापिताऽनवरतमन्वेषणरता वैज्ञानिकाः साधुवादार्हा अभिनन्दनीयाश्च। एतेषामेव सफलप्रयासैः 16 जनवरी, 2021 तः केन्द्रसर्वकारेण प्रथमपंक्तौ समायातानां नागरिकाणां कृते निःशुल्कटीकाभियानं समारब्धम्।

अन्तरन्तः केचन राज्यसर्वकाराः नेतारश्च यशोऽभिलाषेण राजनीतिकस्वार्थसाधनाय टीकाभियानस्य साफल्यं स्वयमवाप्तुं केन्द्रसर्वकारस्य पुरतः टीकाद्रव्याणां क्रयणस्याधिकारमायत्तीकृतवन्तः। परं शनैः शनैरसफला राज्यसर्वकाराः पुनः प्रधानमन्त्रिणमन्वरुद्ध्यन्त यदिमानि टीकाद्रव्याणि केन्द्रसर्वकार एव क्रीत्वा राज्यसर्वकारेभ्यः प्रदद्यात्। देशवासिनां हितेच्छया प्रधानमन्त्री समुद्घोषितवान् यज्जनसामान्यस्य कृते 21 जून, 2021 तः निःशुल्कं टीकाकरणव्यवस्थायै केन्द्रसर्वकारः टीकाद्रव्याणि क्रीत्वा राज्यसर्वकारेभ्यः समर्पयिष्यते। सम्भाव्यते यज्जूनमासस्य 21 दिनांकतः 18 + आयुवर्गे समागतानां जनानां कृतेऽपि टीका द्रव्याणां सुलभता भविष्यति। कोरोना व्याधिश्च शीघ्रमेव पराजितो भविष्यति।

अत्राप्येका समस्या वर्तते यत् कुत्रचित् वर्गविशेषस्य जनाः सामान्यजना अपि कुत्सितराजनीत्या दिग्भ्रान्ता आशङ्कन्ते यट्टीकाद्रव्येण (Vaccine) जना पञ्चत्वं गताः नपुंसकाश्च भवन्तीत्येवम्। सर्वाऽप्येषा भ्रान्तिरपि दूरीकरणीया। अपरा च समस्या जाता यदनवधानतया टीकाद्रव्याणां दुरुपयोगो भवति प्रायेण सर्वकारीय चिकित्साकेन्द्रेषु। निजी-चिकित्साकेन्द्रेषु तन्न भवति। राजस्थानस्यैव जैसलमेरजनपदे शत-प्रतिशत-टीका-द्रव्याणां सदुपयोगः सञ्जातः सर्वकारीयचिकित्साकेन्द्रेषु, परमन्यत्र विपरीता गतिः। एतदपि चिन्तनीयम्।

अस्तु! एकस्यां शताब्द्यां 'महामारी' वारमेकमवश्यं समायातीति ऐतिह्यम्। कस्मात् कारणात्? देशकाला-निलाम्भसां वैगुण्यात्। देशकालादीनां वैगुण्यञ्च कस्मात्? अधर्मात्। स चाधर्मः कस्मात्? पूर्वकृतेभ्योऽसत्कर्मभ्यः। तर्हि तयोरधर्मासत्कर्मणोः मूलं किम्? **प्रज्ञापराधः**। अतः प्रजाजनैः शासकवर्गैश्च सुविचिन्त्य विश्वस्मिन् भूमण्डले 'प्रज्ञापराधो' निरोधव्यः। सर्वमेतद् आयुर्वेदचिकित्साग्रन्थेषु चर्चितम्।

आचार्यश्चरकः **प्रज्ञापराधं** सम्परिभाषते -

**धी-धृति-स्मृतिविभ्रष्टः कर्म यत् कुरुतेऽशुभम्।**
**प्रज्ञापराधं तं विद्यात् सर्वदोषप्रकोपणम्॥**

-चरकसंहिता, शारीरस्थानम्, 1/102

अतो विश्वस्मिन् जगति प्रज्ञापराधनिवारकोपायाः क्रियान्विता भवेयुरेतदर्थमपि यथाकालं यथास्थानं सद्विचाराणां भारतीय-आयुर्वेदचिकित्साशास्त्रस्य च विश्वजनीननेतृणां समक्षं समुपस्थापनं करणीयम्। अधुना योगदिवसरूपेण योगस्य प्रसारोऽखिलेऽपि संसारे सञ्जातः, एतदपि प्रज्ञापराधनियन्त्रणे समीचीनः प्राथमिकः प्रयासः। एतदर्थमस्माकं प्रधानमन्त्री श्रीनरेन्द्रमोदीमहोदयः साधुवादार्हः। जयतु संस्कृतम्। जयतु भारतम्।

**व्याकरणपीठाध्यक्षचरः, जगद्गुरु-रामानन्दाचार्य-**
**राजस्थान-संस्कृत-विश्वविद्यालयः, जयपुरम्**
**दूरभाषाङ्कः 8386943655**

# काव्य-गुणाः

❑ प्रोफेसर सुरेन्द्रकुमारशर्मा

"काव्यगुणाः" इत्यस्मिन् विषये विचारणायां काव्ये गुणानां किं स्वरूपम्? कीदृशी तत्र गुणानां स्थितिः? कति विधाश्च भवन्ति ते गुणाः? इत्यादयो विषयाः समालोचनीयत्वेनापतिताः। सुविदितमेवैतत् साहित्यविदां यत् भिन्नैः भिन्नैराचार्यैरत्र विभिन्नानि मतान्युपस्थापितानि स्वीयेषु ग्रन्थेषु स्थितिविषयकाणि संख्याविषयकानि च। परमेतदपि सत्यं यत् प्रायशः प्रमुखैराचार्यैः काव्ये गुणानामपरिहार्यत्वमनिवार्यत्वमेव स्वीकृतम्। अनेकैराचार्यैः स्वकीयेष काव्यलक्षणेषु प्रत्यक्षतया गुणशब्दसन्निवेशात्, कतिपयैश्च परोक्षतया गुणानां काव्येऽपरिहार्यत्वमेव प्रतिपादितम्। तदत्र प्रथमन्तावत् तत्तत्काव्यलक्षणान्येवात्र प्रदर्श्यन्ते। तद्यथा-

अग्निपुराणे गुणवत् वाक्यं काव्यमित्यङ्गीकृतम्[1]। धारानरेशो भोजः गुणवत् काव्यं कुर्वन् कविः कीर्तिं प्रीतिञ्च विन्दतीतिमतमुपस्थापयति[2]। सुविख्यातः आचार्यो मम्मटः सगुणयोः शब्दार्थयोः काव्यत्वमुररीकरोति[3]। एवमेवाचार्यो हेमचन्द्रोऽपि सगुणयोः शब्दार्थयोः काव्यत्वमङ्गीकरोति।[4] चन्द्रालोककारः आचार्यो जयदेवः गुणभूषणा वाक् काव्यमिति प्रत्यपादयत्[5]। इदमत्र ज्ञातव्यं यत् काव्यलक्षणेभ्यः गुणांश एवात्र विवेचने सङ्गृहीतः, शेषन्तु लक्षणेषु द्रष्टव्यमेवास्ति।

यैश्चाचार्यैः काव्यलक्षणेषु गुणशब्दस्य प्रत्यक्षतया सन्निवेशस्तु नैव विहितः किन्तु परोक्षतया तत्र गुणानां सम्पर्कं सूचितस्तेषां मतान्यप्यत्र प्रस्तूयन्ते। यथाहि आचार्यो वामनः स्वकीये काव्यलक्षणे "**काव्यं ग्राह्यमलङ्कारात्**[6]" इत्येवं प्रस्तौति। अत्र कोऽयमलङ्कारो यद्बलादाचार्यः काव्यस्य ग्राह्यतामङ्गीकरोति इति जिज्ञासायामग्रिमं सूत्रमत्रैवावतारयति वामनः "**सौन्दर्यमलङ्कारः**"[7] इति। अत्रापि पुनः जिज्ञासा जागर्ति यद् योऽमलङ्कारः सौन्दर्यत्वेन प्रतिपादितः, तत्र किमात्मकं सौन्दर्यमभीष्टं वर्तते। एतज्जिज्ञासाशमनाय वामनः तृतीयं सूत्रमवतारयति "**स दोषगुणालङ्कारहानादानाभ्याम्**[8]" इति। एवं प्रस्फुटति दोषाणामभावो गुणालङ्कारयोश्च ग्रहणं भवति सोऽलङ्कार एव सौन्दर्यमिति क्रमशः सूत्रे हानादानाभ्यामिति पदाभ्यां प्रतिपद्यते। अत्र स्वाभाविकी शङ्का समुदेति यत् यदोभयत्र द्वितीय-तृतीयसूत्रयोरलङ्कारपदस्य ग्रहणमाचार्येण कृतं तद् सौन्दर्यस्वरूपेऽप्यलङ्कारे कस्यान्यस्यालङ्कारस्य ग्रहण-विधानमत्राभीष्टं वर्तते। "यदुपादानं" दोषगुणालङ्कार-हानादानाभ्यामिति सूत्रे विहितं वर्तते।

---

1. संक्षेपाद् वाक्यमिष्टार्थव्यवच्छिन्ना पदावली।
   काव्यं स्फुरदलंङ्कारं गुणवद्दोषवर्जितम्।।
   (अग्निपुराणम्-अध्याय 337, श्लोकः 6-7)
2. निर्दोषं गुणवत् काव्यमलङ्कारैरलङ्कृतम्।
   रसान्वितं कविः कुर्वन् कीर्तिं प्रीतिञ्च विन्दति।
   (सरस्वतीकाण्ठाभरणम्-1-2)
3. "तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि।"
   (काव्यप्राकशः-1-2)
4. अदोषौ सगुणौ सालङ्करौ च शब्दार्थौ काव्यम्
   (काव्यानुशासनम् 1-11)
5. निर्दोषा लक्षणवती सरीतिर्गुणभूषणा।
   सालङ्काररसानेकवृत्तिर्वाक् काव्यनामभाक्।। (चन्द्रालोके 1/8)
6. काव्यालङ्कारसूत्राणि प्रथमाधिकरणम्-अध्याय-1, सूत्रम् 1
7. काव्यालङ्कारसूत्राणि प्रथमाधिकरणम्-अध्याय-1, सूत्रम् 2
8. काव्यालङ्कारसूत्राणि प्रथमाधिकरणम्-अध्याय-1, सूत्रम् 3

शङ्कायाः समाधानेऽत्र ध्यातव्यं यद् गुणविवेचनात्मके तृतीयाधिकरणस्य प्रथमाध्याये काव्यशोभाधायकत्वेन गुणानां, तज्जन्यशोभावर्धकत्वेन चालङ्काराणां स्थितिमाकलयति काव्ये आचार्यो वामनः। अतश्च काव्ये या शोभा गुणैरुत्पाद्यते स्थाप्यते वा तत्र चोत्पन्नायां शोभायां योऽयमतिशयोऽलङ्कारैः क्रियते, सा शोभैव सूत्रे अलङ्कारपदेन निर्दिष्टा वर्तते न त्वलङ्करणानाङ्कृते तत्रालङ्कारशब्दप्रयोगः, इत्याचार्यस्यात्राभिप्रायः। **''काव्यशब्दोऽयं गुणालङ्कारसंस्कृतयोः शब्दार्थयोः वर्तते। भक्त्या तु शब्दार्थमात्रवचनो गृह्यते''** इति प्रथमसूत्रस्यैव वृत्तौ स्पष्टयता वामनेन **''गुणालङ्कारसंस्कृतयोः''** पदेन मन्ये एष एवाभिप्रायः संकेतितः।

तदेवं प्रतिपद्यते यत् गुणालङ्कारविशिष्टौ शब्दार्थौ काव्यमिति वामनेन व्यवस्थापितम्। अतश्चात्रापि गुणानामपरिहार्यत्वं काव्ये सिद्ध्यति।

चमत्कारमेव काव्यसर्वस्वत्वेन स्वीकुर्वाणः आचार्यः **''वागर्थौ सचमत्कारौ काव्यं काव्यविदो विदुः**[9]**''** इति काव्यस्वरूपमभिव्यञ्जयन् तत्र सप्त चमत्कारकारणानि स्वीकरोति। तद्यथा-

**गुणं रीतिं रसं वृत्तिं पाकं शय्यामलङ्कृतिम्।**
**सप्तैतानि चमत्कार-कारणं ब्रुवते बुधाः।।**[10] **इति।**

अत्र संख्यातेषु कारणेषु प्राथम्येन गुणस्यैव ग्रहणात् काव्ये गुणानामपरिहार्यत्वं प्रतिपद्यत एव।

एवमेवालङ्कारकौस्तुभकारेण **''कविवाङ्निर्मितिः काव्यम्''**[11] इति काव्यस्वरूपं विशदयता **''असाधारणचमत्कारकारिणी रचना हि निर्मितिः।''** एवञ्च रसापकर्षकदोषरहितं यथासम्भव-गुणालङ्कारयुक्तं रसात्मकं शब्दार्थयुगलं काव्यमिति स्वीयं स्वारस्यं प्रकटितम्।

इत्येवमेतेषामाचार्याणां काव्यलक्षणविवेचनप्रसङ्गेन एतत् स्फुटीभवति सुतरां यत् काव्यजगति प्रत्यक्षतया परोक्षतया वा गुणानामपरिहार्यता अनिवार्यता च प्रायः सर्वेषामप्याचार्याणामभीष्टा वर्तते। एतेन काव्ये गुणानामनिवार्या स्थितिः स्वत एव प्रतिपद्यते।

इदानीं विवेचनीयत्वेनापतितं यद् ये गुणाः काव्यात्मभूततत्त्वस्य धर्माः सन्ति तेषां किं स्वरूपम्, कति संख्याकाश्च ते सन्ति? गुणस्वरूपविषये तु तादृशं वैमत्यमाचार्येषु नैव लक्ष्यते यादृशं संख्याविषये दृश्यते। प्रथमन्तावदत्र नाट्यशास्त्रप्रणेतुराचार्यस्य भरतस्यैव गुणविषयिणी दृष्टिरालोच्यते। तत्र हि **''सुखं हि दुःखान्यनुभूय शोभते''** इत्युक्त्यनुसारं दोषान् विना कथन्नाम गुणमहत्त्वमवगन्तुं शक्यते, इति कृत्वा प्रथमं दशदोषाणामुल्लेखं विधाय त एव विपर्यस्ताः गुणाः इति नाट्यशास्त्रस्य सप्तदशाध्याये प्रतिपादितं भरतेन[12]। तत्र प्रथमो हि दोषो गूढार्थस्तस्य लक्षणमेवमाह आचार्यः **''पर्यायशब्दाभिहितं गूढार्थमभिसंज्ञितम्''**[13] इति पर्यायशब्देन कृते कथने गूढार्थं नाम दोषो भवति। तद् वैपरीत्ये च प्रथमतया निर्दिष्टः श्लेषो नाम गुणस्तस्य च लक्षणं **''विचार्यग्रहणं वृत्त्या स्फुटञ्चैव स्वभावतः। स्वतः सुप्रतिबन्धश्च श्लिष्टं तत्परिकीर्त्यते''**[14] इति। अत्र

9. चमत्कार चन्द्रिका-प्रथमविलासः।
10. चमत्कारचन्द्रिका-प्रथमविलासः।
11. अलङ्कारकौस्तुभम्-प्रथमकिरण

12. (क) ''गूढार्थमर्थान्तरमर्थहीनं भिन्नार्थमेकार्थमभिप्लुतार्थम्। न्यायादपेतं विषमं विसन्धि शब्दच्युतं वै दश काव्यदोषाः।।'' (नाट्यशास्त्रम्-17/88) (ख) ''एत एव विपर्यस्ताः गुणाः काव्येषु कीर्तिताः।।'' (नाट्यशास्त्रम्-17/95) (ग) ''श्लेषः प्रसादः समता समाधि माधुर्यमोजः पदसौकुमार्यम्। अर्थस्य च व्यक्तिरुदारता च कान्तिश्च काव्यस्य गुणा दशैते।।'' (नाट्यशास्त्रम्-17/96)
13. नाट्यशास्त्रम्, अध्याय-17/79
14. नाट्यशास्त्रम्, अध्याय-17/97

स्वभावतोऽर्थस्फुटत्वे श्लेषो नाम गुणः इति प्रतिपादयता भरतेन निगदितं यद् दोषेभ्यो वैपरीत्ययुक्ता एव गुणाः भवन्ति।

विषयेऽत्राग्निपुराणकारस्तु किमप्यन्यदेव वक्ति। तथाहि-

**''न च वाच्यं गुणो दोषो भाव एव भविष्यति।**
**गुणाः श्लेषादयो दोषाः गूढार्थाद्याः पृथक् कृताः।।''**

(अग्निपुराणम् अध्याय-346, 94-2) इति एतेन श्लेषादयो दश गुणाः, गूढार्थादयो दश दोषाश्चा-भावात्मकतया वैपरीत्येन वा न परस्परं सम्बद्धाः सन्तीति प्रतिपन्नं भवति।

स्वयम् अग्निपुराणकारः गुणान् काव्ये महच्छोभा-धायकत्वेनाङ्गी करोति।[15]

एवमाचार्यो भरतो गुणानां दशत्वं प्रतिपादयति। अग्निपुराणस्य चात्रापि गुणानां संख्याविषये कश्चिद् भिन्न एव पन्था लक्ष्यते। तत्र हि प्रथमं तावत्-

**अलङ्कृतमपि प्रीत्यै न काव्यं निर्गुणं भवेत्।**
**वपुष्यललिते स्त्रीणां हारो भारायते परम्।।**

(अग्निपुराणम् अध्यायः 346/1)

इति, अलङ्कारैरलङ्कृतमपि गुणविहीनं काव्यं ग्राह्यं नैव भवतीति गुणानां महत्त्वं प्रदर्श्य, तत्स्वरूप-निर्देशमनन्तरम् गुणभेदाः प्रदर्शिताः सन्ति। प्रथमं सामान्यविशेषत्वेन गुणान् द्विधा विभज्य पश्चात् सामान्यस्य भेदोपभेदान् प्रदर्शयत्यग्निपुराणकारः। तत्र हि सर्वसाधारणीभूतः सामान्यो गुणः शब्द-अर्थ-शब्दार्थो-भयगतत्वेन च त्रिधा विभक्तः। तत्रापि शब्दगुणः श्लेषादिभेदेन सप्तधा विभक्तः। अर्थगुणः माधुर्यादिभेदेन षड्धा, शब्दार्थोभयगुणश्च प्रसादादिभेदेन षड्धा विभक्तीकृतः। पुनश्च शब्दार्थोभयगतगुणस्य षट्सु भेदेष्वन्यतमयोः पाक-रागेतिभेदयोः क्रमशश्चत्वारस्त्रयश्च भेदाः अपि तत्र प्रदर्शिताः सन्ति।[16] एवं हि शब्दरूपशब्दाश्रितः शब्दगुणः। शब्दमाध्यमेन प्रस्तुते विषये उत्कर्षविधायकत्वेनार्थगुणः, शब्दार्थोभयमुप-कुर्वाणश्च शब्दार्थोभयगुणोऽत्रेति प्रतिपद्यते।

एवं सामान्यगुणस्य भेदोपभेदान् प्रदर्श्य वैशेषिको नाम विशेषगुणोऽत्र कीर्तितः। यथाहि-

**''वैशेषिको परिज्ञेयो यः स्वलक्षणगोचरः''** इति (अग्निपुराणम्-346/25)

अत्राभिप्रायं स्पष्टयति पुराणकारो यत् यो गुणः कुत्रापि विशिष्टायां रचनायां व्यक्तिशः स्वस्व-रूपेणावस्थितो भवति स वैशेषिकत्वेन मन्तव्य इति। अनेनाग्निपुराणमते भेदोपभेदगणनया गुणानामेकत्रिंश-त्वमुपलभ्यते।

गुणानां संख्या विषयकमेनं मतभेदमाचार्याणां संकेतयन् सरस्वतीतीर्थाः सम्यगेवाहुः- **''राजा भोजो गुणानाह विंशतिं चतुरश्च यान्। वामनो दश तान् वाग्मी भट्टस्त्रीनेव भामहः''**इति।

भोजनिरूपितं दशमं साहित्यं गुणोपादानं नाम। अत्र काव्ये चारुत्वातिशयसमुत्पादनाय गुणानां ग्रहणमिति

15. ''यः काव्ये महतीं छायामनुग्रह्णात्यसौ गुणः''
(अग्निपुराणम् अध्याय-346, पद्य-4)

16. (क) सर्वसाधारणीभूतः सामान्य इति मन्यते।
शब्दार्थमुभौ प्राप्तः सामान्यो भवति त्रिधा।। अ.पु. 346/4
(ख) शब्दमाश्रयते काव्यं शरीरं य स तद् गुणः।
श्लेषो लालित्यगाम्भीर्ये सौकुमार्यमुदारता।। अ.पु. 346/5
(ग) उच्यमानस्य शब्देन येन केनापि वस्तुना। उत्कर्षमावहन्नर्थो गुण इत्यभिधीयते।।। अ.पु. 346/11 माधुर्यं संविधानं च कोमलत्वमुदारता। प्रौढिसामयिकत्वं च तद्भेदाः षट् चकासति।। अ.पु. 346/12
(घ) शब्दार्थावुपकुर्वाणो नाम्नोभयगुणः स्मृतः। तस्य प्रसादः सौभाग्यं यथासंख्यं प्रशस्यता। पाको राग इति प्राज्ञैः षट् प्रपञ्चविपञ्चिताः ।। अ.पु. 346/18-19
(ङ) ''मृद्वीकानारिकेलाम्बुपाकभेदाच्चतुर्विधः''।। अ.पु. 346/23
(एते पाकस्य चत्वारो भेदाः)
(च) रागस्य त्रयो भेदाः- ''हारिद्रश्चैव कौसुम्भो नीलिरागश्च स त्रिधा''।। अ.पु. 346/25

काव्यचारुत्वातिशयस्याधायका गुणा इति भोजमतम्। भोजेन गुणालङ्कारयोर्मध्ये भेदसृष्टिं समुत्पादयता गुणोपादाने नियमः, अलङ्कारयोगे च कामचार इति प्रदर्शितम्। भोजेन गुणानां त्रैविध्यं पूर्वं बाह्याः शब्दगुणाः, आन्तरा अर्थगुणाः, वैशेषिका दोषगुणाः इत्युपपाद्य तेषां त्रिविधानामपि गुणानां प्रत्येकस्य चतुर्विंशतिः भेदाः वर्णितास्ते च यथा नाम्नाऽत्र प्रदर्श्यन्ते- ''**श्लेषः, प्रसादः, समता, माधुर्यम्, सौकुमार्यम्, अर्थव्यक्तिः, कान्तिः, उदारता उदात्तत्त्वम्, ओजः, और्जित्यम्, प्रेयः, सुशब्दता, समाधिः, सौक्ष्म्यम्, गाम्भीर्यम् विस्तरः, संक्षेपः, संमितत्वम्, भाविकत्वम्, गतिः, रीतिः उक्तिः, प्रौढिरिति।**[17]'' अत्र नाम्नैक्यं स्वरूपतश्च भेदः प्रदर्शितः।

एवं गुणानां संख्या बाहुल्ये आचार्यो भामहो मन्ये सर्वतः प्रथमं गुणानां त्रित्वं स्वीकरोति। काव्यालङ्कारस्य द्वितीये परिच्छेदे प्रारम्भिकेषु त्रिषु पद्येषु क्रमशः प्रसादः, ओजः, माधुर्यञ्चेति त्रयाणां गुणानां रचनात्मकं स्वरूपन्त्राभिधत्ते भामहः। तथाहि-

''**माधुर्यमभिवाञ्छन्तः प्रसादं च सुमेधसः।।**
**समासवन्ति भूयांसि न पदानि प्रयुञ्जते।।**'' इति
**( काव्यालङ्कारः 2/1 )**

''**असमस्तानां पदानां प्रयोगो यत्र जायते तत्र**
**प्रसादो नाम गुणः। केचिदोजोऽभिधत्सन्तः**
**समस्यन्ति बहून्यपि।।'' ( तत्रैव 2/2 )**

इति समासबहुलरचनायाम् ओजो नाम गुणः।

''**श्रव्यं नातिसमस्तार्थं काव्यं मधुरमिष्यते।**
**आविद्वदङ्गनाबालप्रतीतार्थं प्रसादवत्।।**''
**इति ( तत्रैव 2/3 )**

**श्रव्यत्वं नातिसमस्तार्थं नाम माधुर्यम्।** इति प्रतिपद्यते।

कामं भामहो नात्र प्रसङ्गे तादृशीं प्रचारपीठिकामध्यरुक्षत्, तथापि सत्यन्त्विदमेव यद् गुणानां त्रित्वविधाने आचार्यस्यास्यैव चिन्तनमौलिकत्वं प्राचीनत्वादित्याकूतं साहितीविदाम्।

ओजोगुणस्वरूपनिरूपणे भामहेन ''**केचिदोजोऽभिधत्सन्तः समस्यन्ति बहून्यपि**'' इत्यत्र केचिदिति प्रयोगेण मन्ये नाट्य शास्त्र प्रणेतुः भरतस्य संकेतो विहितस्तत्र हि ओजसि विविधैः समासवद्भिः पदैर्युक्तता स्वीकृता वर्तते।[18]

अत्रेदमपि चिन्तनीयं यदाचार्यो मम्मटः भामहकृतमाधुर्यलक्षणे श्रव्यत्वमिति पदमादायाक्षिपति भामहं **श्रव्यत्वन्तु ओजः प्रसादयोरपि भवतीति कृत्वा।**[19]

इदानीमुल्लेखनीयतयाऽऽभीष्टं मन्येऽत्र यत् भामहकृतकाव्यालङ्कारस्य विवरणे भट्टोद्भटेन यो गुणालङ्कारयोर्मध्ये अभेदः प्रतिपादितस्तदनुसारं लौकिकगुणालङ्कारयोर्मध्ये तु भेदो भवितुमर्हति, यतोहि लोके गुणानामात्मना सह समवायसम्बन्धो भवति, अलङ्काराणाञ्च शरीरेण सह संयोगसम्बन्धोभवति, परं काव्ये तु गुणालङ्कारयोरुभयोरपि समवायसम्बन्धेन स्थितिर्भवति नास्ति काव्यजगति गुणालङ्कारयोर्मध्ये कश्चन भेदः।[20] अत्रापि मम्मटः गुणालङ्कारप्रविभागप्रसङ्गे इत्यभिधानमसदिति कृत्वा मतमेतं भट्टोद्भटस्य खण्डयति। यतोहि मम्मटाचार्यः गुणस्वरूपनिरूपणे काव्यात्मभूतस्य

17. शृङ्गारप्रकाशे - नवमप्रकाशः

18. समासवद्भिर्विविधैर्विचित्रैश्च पदैर्युतम्। सा तु स्वैरुदारैश्च तदोजः परिकीर्तितः।। (नाट्यशास्त्रम् 17/103)

19. ''श्रव्यत्वं पुनरोजः प्रसादयोरपि''
(काव्यप्रकाशः-अष्टमोल्लासः, 68 कारिकावृत्तौ)

20. ''समवायवृत्त्या शौर्यादयः, संयोगवृत्त्या तु हारादयः इत्यस्तु गुणालङ्काराणां भेदः ओजः प्रभृतीनामनुप्रासोपमादीनाञ्चोभयेषामपि समवायवृत्त्या स्थितिः गड्डुलिकाप्रवाहेणैवेषां भेदः'' (भामह विवरणम्)

प्रधानरसस्यापरिहार्यानुत्कर्षाधायकान् धर्मान् एव गुणस्वरूपेण स्वीकरोति। अलङ्काराश्च शब्दार्थशरीर-शोभावर्धनमाध्यमेनोपकुर्वन्ति गुणाः समवायसम्बन्धेन अंलकाराश्च संयोगसम्बन्धेन काव्ये उपतिष्ठन्ते इत्यभिमतं मम्मटस्य।

अथ रीतिसम्प्रदायप्रवर्तकः आचार्यो वामनः यः काव्यात्मत्वेन रीतिं सिद्धान्तयति।[21] रीतिस्वरूप निरूपणप्रसङ्गे वैशिष्ट्ययुक्तां पदरचनां रीतिमाख्याति।[22] अत्रैव वैशिष्ट्ये विद्यमानायां विशिष्टतायां कोऽसौ विशेषः? इत्याकांक्षायाम् ओजः प्रसाद माधुर्यादि गुणस्वरूपमेव तत्र विशेषः इत्यभिप्रैति।[23] विवेचनेनानेन काव्यात्मभूतरीतेरपरिहार्यधर्मत्वेन गुणानामावश्यक-त्वमित्युपादानमाचार्येण कृतमिति मन्ये।

काव्यालङ्कारसूत्रे वामनेनापि भरतस्यैव सरणिमनु-सृत्य ''**यद्विपर्ययात्मनो दोषास्तान् गुणान् विचारयितुं गुणविवेचनमधिकरणमारभ्यते**'' इति प्रतिज्ञातम् द्वितीयाधिकरणे दोषाभिधानानन्तरं तृतीयाधि-करणे गुणनिरूपणात् प्रागिति। अत्र गुणा विपर्यस्ता दोषाः कथ्यन्ते इत्यभिधानं प्रतीयते वामनस्य, भरतस्य दोषा एवं विपर्यस्ता गुणाः इति कथनं वैपरीत्यभावेन प्रदर्शयन्ति।

ते च गुणाः काव्यस्य शोभायाः कर्तारः सन्ति। अत्र काव्यशोभाधायकत्वेन गुणानां स्वरूपं निरूपितं वाम-नेन।[24] गुणाः यां काव्यशोभां जनयन्ति तामेव शोभामलङ्काराः वर्धयन्तीति कृत्वालङ्कारस्वरूप निरूपणेन[25] गुणालङ्कारयोर्विभागोऽपि प्रदर्शितः। अत्रैव चान्वयव्यतिरेकमुखेन कथनमेतत् समर्थयितुं पद्यद्वय-मुपन्यस्तम्। यथाहि-

**युवतेरिव रूपमङ्ग काव्यं**
**स्वदते शुद्धगुणे तदप्यतीव।**
**विहितप्रणयं निरन्तराभिः**
**सदलङ्कारविकल्पकल्पनाभिः।।**

सदलंकारालंकृतायाः युवते रूपलावण्यं यथा रसिकान् समाकर्षति, तथैव ओजःप्रसादादिगुणमात्र-विशिष्टं काव्यमपि सहृदयानाकर्षति। तेभ्यो रोचत इत्यन्वयमुखेन। तथा च -

**यदि भवति वचश्च्युतं गुणेभ्यो**
**वपुरिव यौवनमवन्ध्यमङ्गनायाः।**
**अपि जनदयितानि दुर्भगत्वं**
**नियतमलङ्करणानि संश्रयन्ते।।**

यथा यौवनलावण्यहीना सदलङ्कारयुता युवती दुर्भगत्वात् रसिकप्रिया न भवति, तथैव गुणरहितं काव्यमपि रुचिकरं न भवति। तत्रालङ्करणानि केवलं भारायन्ते इति व्यतिरेकमुखेन काव्ये गुणानां महत्त्वं प्रतिपन्नं भवति। अनेन काव्ये गुणानामनिवार्यत्वं वामनमते स्थिरीभवति, परं मम्मटः काव्यप्रकाशे अत्राप्याक्षिपति। तन्मते यदि समस्तैः गुणैः काव्य व्यवहारश्चेत्तदा ''**ओजः कान्तिमती गौडीया**'' (1.2.12) ''**माधुर्यसौकुमार्योपपन्ना पाञ्चाली**'' (1.2.13) इत्यसमस्तगुणे गौडीपाञ्चाल्यौ कथं काव्यात्मत्वेन स्वीकरणीये तथा च कतिपयैरेव गुणैः काव्यव्यवहारोऽभीष्टश्चेत्। ''अद्रावत्र प्रज्वलत्यग्नि रित्यादौ ओजः प्रभृतिगुणेषु सत्सु काव्यव्यवहारापत्ति-रिति। वामनमते एते गुणाः नित्याः सन्ति।[26] एवञ्च नित्यानित्यत्वादपि गुणालङ्कारयोर्विभागः प्रदर्शितो भवति। गुणानां संख्याक्रमे वामनो दशत्वन्तेषां

21. ''रीतिरात्मा काव्यस्य'' (काव्यारलङ्कारसूत्राणि, अधिकरणम्-1, अध्याय-2, सूत्र-6)
22. ''विशिष्टा पदरचनारीतिः'' (तत्रैव-1-2-7)
23. ''विशेषो गुणात्मा'' (तत्रैव-1-2-8)
24. ''काव्यशोभायाः कर्त्तारो धर्मा गुणाः'' (काव्यालंकारसूत्र-3.1.1)
25. ''तदतिशयहेतवस्त्वलङ्काराः'' (तत्रैव-3/1/2)
26. ''पूर्वे नित्याः'' (तत्रैव-3/1/3)

स्वीकरोति। शब्दार्थभेदेन दश शब्दगुणाः दश चार्थगुणाः वामनाभिमताः सन्ति। शब्दार्थगुणयोर्मध्ये नाम्ना त्वेकत्वं स्वरूपतश्च भिन्नत्वं तत्रोपलभ्यते। दश च ते शब्दगुणाः यथा-

''**ओजःप्रसादश्लेषसमतासमाधिमाधुर्यसौकुमार्यो-दारताऽर्थव्यक्तिकान्तयो बन्धगुणाः**'' (3.1.4)

नाम्ना चैते एवार्थगुणाः सन्ति दशसंख्याकाः।[27] एतेषां स्वरूपमत्र विस्तरभिया न समालोच्यते। आचार्यः आनन्दवर्धनोऽपि काव्यात्मभूतरसादिरूपध्वनिमाश्रितान् धर्मान् गुणान् मन्यते। अङ्गिनः आत्मनो धर्मत्वेनैवेषां गुणस्वीकृतिः। शब्दार्थमात्राश्रयत्वादलङ्काराणां गुणेभ्यः पार्थक्यमपि प्रदर्शयत्याचार्य आनन्दवर्धनोऽत्र।[28] एभिरपि गुणानामोजोमाधुर्यप्रसादत्वेन त्रित्वमेव साधितम्। आनन्दवर्धनः गुणरसयोर्मध्ये सहजः सम्बन्धो यथा शृङ्गारकरुणयोः माधुर्येण सह सहजः सम्बन्धः[29], रौद्रस्य चौजसा सहेति मनुते, परं सङ्घटनायाः गुणैः रसैश्च सह सम्बन्धस्यानिवार्यत्वं स नाङ्गीकरोति। ''**श्रव्यत्वं पुनरोजसोऽपि साधारणम्**'' इति कृत्वा भामहमत-मत्राप्याक्षिप्तम्।

एनामेव सरणिमङ्गीकृत्याचार्यो मम्मटोऽपि काव्ये अङ्गीभूतस्य रसस्य धर्मान् ये खलु तस्याङ्गिनो रसस्योत्कर्षाधायकाः, अचलस्थितयश्च धर्माः सन्ति त एव गुणा इति समाख्याति।[30]

इदमत्र बुद्धावायाति यत् समन्वयवादी आचार्यो मम्मटः वामनानन्दवर्धनयोः मतेषु सामञ्जस्यमिव स्थापयन् परिलक्ष्यते। अङ्गिनो धर्मत्वेन गुणानामानन्द-वर्धनमतम् ''उत्कर्षाधायकत्वेन'' ''अचलस्थितितया'' च वामनस्य क्रमशः गुणानां शोभाकर्तृत्वम्, ''पूर्वे नित्याः'' इति गुणानां नित्यत्वरूपं मतञ्च समर्थयन्निव लक्ष्यते आचार्यो मम्मटः।

गुणालङ्कारयोः प्रविभागे मम्मटस्य मतमपि आनन्द वर्धनानुगतमेव भाति। तन्मते शब्दार्थरूपशरीरमाध्यमेन येऽङ्गिनं रसं कदाचिदुपकुर्वन्ति न तु नियमेन ते अनुप्रासोपमादयः अलङ्काराः कथ्यन्ते।[31] एतेन नित्यानित्यत्वेनापि गुणालङ्कारयोर्भेदो गम्यते।

मम्मटो गुणसंख्याविषये गुणानां त्रित्वसाधक आचार्यो येन स्पष्टतयोक्तं ''माधुर्यौजः प्रसादाख्यास्त्रयस्ते न पुनर्दश'' इति (का. पृ. 8) मम्मटमते ''आह्लादकत्वम् आनन्दस्वरूपत्वं यच्च चित्तस्य द्रवणकारणं तन्माधुर्यं नाम गुणः। स च द्रवीभावो यथा शृङ्गारे।[32]'' दीप्तिरूपश्चित्तस्य यो विस्तारस्तस्य हेतुभूतो गुण ओजः कथ्यते। तस्यौजसः वीररसे स्थितिरिति।[33] तृतीयश्च प्रसादो नाम गुणः यथा अग्निः शुष्कमिन्धनम्, यथा झटिति व्याप्नोति तथैव यः सहसैव चित्तं व्याप्नोति तत्रायं प्रसादो नाम गुणः। अस्य स्थितिः सर्वेषु रसेषु रचनासु चापि भवति।[34] रसमात्राश्रयत्वात् गुणानां प्रसादगुणस्य या स्थितिः सर्वासु रचनास्वपि समाख्याता, तत्र हेतुं विवृण्वन् मम्मटो गौण्या वृत्त्या शब्दार्थयोरपि गुणानां स्थितिमङ्गीकरोति।[35] यथा हि

27. ''त एवार्थगुणाः'' (काव्यालङ्कारसूत्राणि-3/211

28. ''तमर्थमवलम्बन्ते येऽङ्गिनं ते गुणाः स्मृताः। अङ्गाश्रितास्त्वलङ्काराः मन्तव्याः कटकादिवत्।। (ध्वन्यालोकः उद्योत-2 कारिका 6)''

29. ''शृङ्गार एव मधुरः परः प्रह्लादनो रसः। तन्मयं काव्यमाश्रित्य माधुर्यं प्रतितिष्ठति।। (ध्वन्यालोकः 2/7''

30. ''ये रसस्याङ्गिनो धर्माः शौर्यादय इवात्मनः। उत्कर्ष-हेतवस्ते स्युरचलस्थितयो गुणाः।।
(काव्यप्रकाशः, उल्लास-8, कारिका 66)''

31. उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित्। हारादिव-दलङ्कारास्तेऽनुप्रासोपमादयः।। (काव्यप्रकाश-8/67)

32. ''आह्लादकत्वं माधुर्यं शृङ्गारे द्रुतिकारणम्'' (काव्यप्रकाशः 8/68)

33. ''दीप्त्यात्मविस्तृते हेतुरोजो वीररसस्थितिः'' (तत्रैव 8/69)

34. ''शुष्केन्धनाग्निवत् स्वच्छजलवत्सहसैव यः।
व्याप्नोत्यत् प्रसादोऽसौ सर्वत्र विहितस्थितिः।।'' (तत्रैव 8/70)

35. ''गुणवृत्त्या पुनस्तेषां वृत्तिः शब्दार्थयोर्मता।।'' (तत्रैव 8/71)

शौर्यादीनामात्मगुणानां स्थूले शरीरेऽपि स्थितिराकलिता भवति, तथैव रसमात्रैक-वृत्तीनामेतेषां माधुर्यादीनां गुणानां व्यञ्जकेषु सुकुमारादि- वर्णेषु, अर्थेषु, रचनासु च यः प्रयोगो भवति, स गौण एव मन्तव्यः।

''न पुनर्दश'' इति कथनेन वामनोक्तं गुणानां दशत्वं दार्ढ्र्येन निराकरोति। तेषु दशसु गुणेषु कांश्चित् स्वीयेषु त्रिष्वेव गुणेष्वन्तर्भावयति, कांश्चन, दोषाभावरूपेण, कांश्चिच्च दोषत्वेनाङ्गीकरोति मम्मटः।[36] यथाहि- ''**बहूनां पदानामेकपदवद्भासनात्मा श्लेषः, आरोहा-वरोहक्रमरूपः समाधिः विकटत्वलक्षणा उदारता, ओजोमिश्रितशैथिल्यात्मा प्रसादस्तान् चतुरो गुणान् ओजस्य अन्तर्भावयति। पृथक् पदत्वं माधुर्यं माधुर्ये एवान्तर्भावयति। अर्थव्यक्तिश्च प्रसादेनैव गृहीता भवति। एवं षण्णां गुणानां स्वाभिमतेषु त्रिष्वेव गुणेष्वन्तर्भावं प्रदर्श्य, मार्गाभेदरूपायाः समताया दोषत्वं क्वचिदङ्गीकृतं भवति। कष्टत्वग्राम्यत्वयोः दोषपरित्यागत्वेन अपारुष्यरूपसौकुमार्यस्य, औज्ज्वल्यरूपकान्तिगुणस्य ग्रहणात् तयोः दोषा-भावरूपत्वमङ्गीक्रियते। ओजसस्तु स्वाभिमते ओजस्येवान्तर्भावं सूचयित्वा मम्मट आह**'' एवं न दश शब्दगुणा इति।

एवमेव च दश अर्थगुणानामप्युपर्युक्तपद्धत्यैव निराकरणं विधाय स्पष्टीकरोति मम्मटः''**तेन नार्थगुणाः वाच्याः**'' (काव्यप्रकाश 8/73) एतेन अर्थगुणाः पृथक् न वक्तव्याः इति। पूर्वं शब्दगुणत्वेनोक्तानां माधुर्यादीनां व्यञ्जकत्वेन ''**वर्णाः समासो रचना तेषां व्यञ्ज-कतामिताः**'' (काव्यप्रकाश 2/18) इति सूत्रयित्वा मम्मटः वर्णाः समासः, पदसंघटनारूपा रचना चैतेषां व्यञ्जकत्वं प्राप्नुवन्तीति प्रतिपाद्य के के वर्णादयः कस्य कस्य गुणस्याभिव्यञ्जकाः भवन्तीति प्रत्येकशः प्रत्यपादयत्। अन्ते च यद्यपि सङ्घटना गुणाश्रितैव भवति तथापि वक्तृवाच्यप्रबन्धादीनामौचित्येन वर्णादीनामन्यथा प्रयोगोऽप्यौचितीमावहतीति एतदौचितीं सोदाहरणं प्रदर्शितवान् मम्मटाचार्यः।[37]

साहित्यदर्पणकारो विश्वनाथोऽपि ''**रसस्या-ङ्गित्वमाप्तस्य धर्माः शौर्यादयो यथा गुणाः**'' (साहित्यदर्पण 8/1) इति अङ्गिनो रसस्य धर्मत्वेन गुणान् स्वीकृत्य त्रित्वमेव प्रतिपादयति तेषाम्। मम्मटानुगामिनी सरणिरेव तत्र वामनाभिमतदशगुणप्रसङ्गे समवलम्बिता विश्वनाथेनापि। चन्द्रालोककारो जयदेवस्तु श्लेष-प्रसाद-समता-समाधि-ओजः माधुर्यम्, सौकुमार्यम्-उदारतेत्यष्टगुणानां पृथक्-पृथक् लक्षणो-दाहरणमाध्यमेनोल्लेखं विधाय, वामनोक्त कान्तिगुणस्य शृङ्गारे, अर्थव्यक्तेश्च प्रसादे संग्रहं प्रदर्श्य काव्ये एते दश गुणाः तिष्ठन्तीति प्रत्यपादयत्।[38]

पण्डितराजो जगन्नाथः-

पण्डितराजेन स्पष्टतया तु किमपि गुणलक्षणं रसगङ्गाधरे न प्रतिपादितं, किन्तु तद्गतेन तत्रत्येन विवेचनेनैवं स्पष्टीकृतं यत् ''**द्रुत्याद्यन्यतमचित्तवृत्ति-प्रयोजकत्वमेव गुणसामान्यलक्षणम्**'' इति। द्रुतिदीप्ति-विकासाख्याः याः खलु तिस्रश्चित्तवृत्तयो माधुर्यौजः- प्रसादगुणेषु क्रमशः प्रतिपादिताः सन्ति मम्मटादिभिस्ता एव चित्तवृत्तयो यदा रसादिभिः सह सम्बन्धं स्थापयन्ति, तदा ता एव चित्तवृत्तयो गुणनाम्ना समाख्यायन्ते। तदेवं शब्दे-अर्थे-रसे-रचनायां च प्रयोजकतासम्बन्धेन स्थिताः दुत्यादयश्चित्तवृत्तयः एव

36. ''केचिदन्तर्भवन्त्येषु दोषत्यागात्परे श्रिताः। अन्ये भजन्ति दोषत्वं कुत्रचिन्न पुनर्दश।।'' (तत्रैव 8/72)

37. ''वक्तृवाच्यप्रबन्धानामौचित्येन क्वचित् क्वचित्।
रचनावृत्तिवर्णानामन्यथात्वमपीष्यते।।'' (काव्यप्रकाशः 8/77)

38. ''शृङ्गारे च प्रसादे च कान्त्यर्थव्यक्तिसंग्रहः।
अमी दश गुणाः काव्ये पुंसि शौर्यादयो यथा।।''
(चन्द्रालोकः, मयूख 4, पद्य 10)

माधुर्यादयो गुणाः सन्ति। अत्र वर्णः शब्दः, अर्थः रचना चापि चित्तवृत्तीनामासां प्रयोजकाः सन्ति।

मम्मटादयो गुणानां रसमात्रैकधर्मत्वं यत् स्वीकुर्वन्ति तत्र पण्डितराजस्य विमतिः स्पष्टतया प्रदर्शिता भवति। ''**रसधर्मत्वे किं मानम्**'' इति प्रश्नमुपस्थाप्य पण्डित-राजस्तत्र सोदाहरणं स्वाभिमतमुपस्थायति। यथाहि-

अनलस्य कार्यं वस्तुदाहादिश्चक्षुषा गृह्यते, तदनलगत उष्णस्पर्शश्च पृथक् त्वचा गृह्यते, तेन हि यथाऽनले दाहादेरतिरिक्ततया उष्णस्पर्शानुभवः, न तथा रसे चित्तद्रवणजनकत्वादतिरिक्तः कश्चिद् गुणोऽनुभूयते। न च गुणविशिष्ट एव रसो द्रुत्यादिचित्तवृत्तीः प्रति कारणम् तथा च कारणतावच्छेदकत्वेन गुणा अनुमीयेरन् नैजस्वरूपेणैव शृङ्गारादीनां कारणत्वसिद्धौ गुणकल्पन-पर्यन्तानुधावनस्य गौरवग्रस्तवैयर्थ्यात्। न च शृङ्गारादौ माधुर्यवत्त्वस्य सत्त्वादेव कारणतास्वीकारो लघुरिति वाच्यम्, मधुरो मधुरतरो मधुरतम इत्येवमादिरूपेण। कारणानां कार्याणाञ्च भेदात् नैयत्येन कार्यकारण-भावनिर्धारणस्य परमतस्वीकारेऽप्यसम्भवात्। एवञ्च शृङ्गारादिः शृङ्गारत्वेन रूपेणैव अनुभूयमानः द्रुत्यादिं चित्तवृत्तिं प्रति कारणं भवतीत्येव गम्यते। शृङ्गारो मधुर इत्यादि-व्यवहारस्तु न जागतिकव्यवहारोपमोऽपितु रसव्यक्तौ यत्प्रयोजकत्वं किं वा द्रवणं प्रति या योग्यता सैव मधुरत्वादिरूपेति।

अथवा यथा अश्वगन्धायाम् उष्णत्वमुत्पादकत्व-सम्बन्धेन स्वीक्रियते, तथैव शृङ्गारादावेव प्रयोजक-त्वसम्बन्धेन द्रवणादिः स्वीकर्तव्यः। रसव्यक्तौ अन्यथा भावेन तिष्ठन्नेव द्रवणादिः द्रवणत्वादिनाऽपश्चादनुभूयमान एव घनतामुपेतो रसत्वेनानुभवपदवीमारोहतीत्येव पडितराजाभिमतम्। अत्र गुणानां न रसातिरिक्ततया स्वीकार इति विशेषः।

जरत्तरास्त्वित्यादिना वामनाभिमतदश शब्द-गुणानामर्थगुणानाञ्चापि सोदाहरणं विवेचनं विधाय, तेषामन्तर्भावञ्च प्रदर्श्य, तत्तद्गुणव्यञ्जनक्षमायाः निर्मितेश्च (वर्णादीनाम्) प्रतिपादनं विधाय तत्र सामान्यतो विशेषतश्च वर्जनीयानां वर्णादीनां निरूपणमत्र गुणप्रसङ्गे पण्डितराजेन कृतमिति विशेषः कश्चिदाभाति।

तदेवं विवेचनेनानेन गुणानां त्रित्वमेव राद्धान्त-त्वेनाचार्याणामभिमतमिति प्रतिपद्यते। तत्र हि किं बीजमिति चिन्तने ''**सत्त्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः**'' (गीता 14/5) ''**प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि। विकारांश्च गुणांश्चैव विद्धि प्रकृतिसम्भवान्।**'' (गीता 13/19) इत्यादि गीतोक्त-वाक्यप्रकाशे प्रकृतेरनादित्वात्तत्सम्भवगुणानां त्रित्वं बुद्धौ निधायैव काव्ये गुणानां त्रित्वसाधने आचार्याणामभि-मतिर्जातेति मन्ये। अपि च कालिदासीया ''**नमस्त्रिमूर्त्तये तुभ्यं प्राक् सृष्टेः केवलात्मने। गुणत्रयविभागाय पश्चाद् भेदमुपेयुषे।।**'' (कुमारसम्भव 2/62) इत्युक्तिरप्येतत्साधनपरा परिलक्ष्यत इति।

अन्ते च मन्मनसि भावः समुद्भूयते यत् यथा भवभूतिः ''**एको रसः करुण एव**'' इत्यादि तथा च शृङ्गारप्रकाशे भोजः ''**शृङ्गारवीरकरुणाद्भुतरौद्रहास्यबीभत्सवत्सलभयानकशान्तनामानः आम्नासिषुर्दशरसान् सुधियो वयन्तु शृङ्गारमेव रसनाद् रसमामनामः**'' (1/6) क्रमशः रसस्य करुणत्वेन शृङ्गारत्वेन च एकत्वस्येव पक्षपातिनौ दृश्येते तथैव ''**सः प्रसादः समस्तेषु रसेषु रचनासु च**'' इत्याचार्याणां वाक्यप्रकाशे गुणानामप्येकत्वं किन्नाङ्गीकरणीयं लाघवलाभायेति? मन्मतौ तु ''**एक एव हि मन्तव्यो गुणः काव्ये मनीषिभिः। सत्त्वोद्रेके प्रसादः सः निर्मलत्वात् प्रकाशकः।**'' इत्यायाति। अलमति-विस्तरेणेति कृत्वा तत्त्वज्ञैः मनीषिभिर्विभावनीयमत्रेति निवेद्य विरमामीति शम्।

**''श्रीनिलयनम्'' ए-277, महेशनगरम्, जयपुरम्**

# आत्मबोधार्थं मोक्षसाधनवर्णनम्

(आद्यशंकराचार्यस्य आत्मबोधग्रन्थे)

(गताङ्कादग्रे)

❏ युगलकिशोरभारद्वाजः

अद्वैत-सिद्धान्तस्य संस्थापकः आद्य-जगद्गुरु-शंकराचार्यः अस्माकं प्रेरणास्रोतोरूपेण संस्थितः। आत्मबोधग्रन्थस्य सहज-सरलहिन्दी-भाषायां लयबद्धं पद्यानुवादं विद्वज्जनानां सम्मुखे संप्रस्तौमि। स एवात्र मूलश्लोकानन्तरं पद्यानुवादमयो निम्नानुसारं प्रस्तुतः-

37 (मूलश्लोकः)

**एवं निरन्तराभ्यस्ता, ब्रह्मैवास्मीति वासना।**
**हरत्यविद्यां विक्षेपान्, रोगानिव रसायनम्।।**

(भावार्थः)

**अविद्याकृत विक्षेप चित्त का,**
**ब्रह्म अरु आतम को भिन्न समझना।**
**आसान नहीं है इसे मिटाना,**
**लक्ष्य बडा जो है पाना।।**
**नित्य निरन्तर मनन भाव से,**
**महावाक्य को ही नित अपनाना।**
**अहं ब्रह्मास्मि मैं ही ब्रह्म हूँ,**
**इसी तत्त्व को दृढ ही रखना।।**

(लाभ)

**सकल विक्षेप नष्ट हो चित्त के,**
**आतम ब्रह्म रूप हो जाता है।**
**दीर्घकाल से कल्प रसायन,**
**रोग मुक्त हो जाता है।।**

38 (मूलश्लोकः)

**विविक्तदेश आसीनो, विरागो विजितेन्द्रियः।**
**भावयेदेकमात्मानं, तमनन्तमनन्यधीः।।**

(भावार्थः)

**इन्द्रियनिग्रही जगतराग तज,**
**एकान्त स्थान में ध्यान धरे।**
**मैं ही ब्रह्म हूँ सदा ब्रह्म में,**
**यही भावना नित्य करे।।**

39 (मूलश्लोकः)

**आत्मन्येवाखिलं दृश्यं, प्रविलाप्य धिया सुधीः।**
**भावयेदेकमात्मानं, निर्मलाकाशवत् सदा।।**

(भावार्थः)

**शुद्ध सत्त्व मय आत्मविवेकी,**
**दृढ़ निश्चय जब करता है।**
**दृश्य प्रपंचिनी बुद्धि को भी,**
**आत्मा में लय करता है।।**
**पंचभूत होते लय प्रकृति में,**
**जैसे नभ निर्मल हो जाता है।**
**इक रस शान्त दशा में आतम,**
**ब्रह्म तत्त्व लय पाता है।।**

(लयमुक्ति)

40 (मूलश्लोकः)

**नामवर्णादिकं सर्वं विहाय परमार्थवित्।**
**परिपूर्णचिदानन्दस्वरूपेणावतिष्ठते।।**

(भावार्थः)

**तत्त्वरूप आत्मा को जाने,**
**वह आत्मविवेकी होता है।**

नानारूपात्मक, दृश्य प्रपंचत्याग,
सुखपूर्वक वह सोता है।।
साक्षी चेतन आत्मतत्त्व में,
स्थित वह हो जाता है।।
वायुरहित स्थान में दीपक,
निश्चल ज्यों हो जाता है।।
उसी प्रकार निश्चल योगी का,
चित्त ब्रह्म रूप हो जाता है।
सच्चिदानन्द साक्षी स्वरूप में,
साधु लय हो जाता है।।

41 ( मूलश्लोकः )

ज्ञातृज्ञानज्ञेयभेदः, परमात्मनि न विद्यते।
चिदानन्दैकरूपत्वाद्, दीप्यते स्वयमेव हि।।

( भावार्थः )

चिदानन्द स्वरूप परमात्मा,
स्वयं प्रकाशित जहाँ हो जावे।
ज्ञाता ज्ञान ज्ञेय त्रिपुटी का,
भेद तनिक नहीं रह पावे।।

42 ( मूलश्लोकः )

एवमात्मारणौ ध्यानं, मथने सततं कृते।
उदितावगतिर्ज्वाला, सर्वाज्ञानेन्धनं दहेत्।।

( भावार्थः )

आत्मारूप अरणि में मंथन,
सतत ध्यान मथनी से होता।
अहं ब्रह्मास्मि वृत्तिरूप ज्ञानज्वाला का,
उदय निरन्तर होता।
अज्ञान रूप कर्मो का इन्धन तो,
पूर्ण रूप से भस्म ही होता।।

43 ( मूलश्लोकः )

अरुणेनेव बोधेन, पूर्वं सन्तमसे हृते।
तत आविर्भवेदात्मा, स्वयमेवांशुमानिव।।

( भावार्थः )

अज्ञान नाश से आवरण हटे सब,
ब्रह्मज्ञान सब क्षोभ मिटाता।
सूर्योदय पूर्व अरुणोदय ही,
ज्यों अंधकार को दूर भगाता।
अज्ञान रूप अंधकार दूर हो,
तब ही आत्म सूर्य प्रतिभा पाता।
एकत्व ज्ञान का बोध सूर्य ही,
अखण्ड ज्ञान ज्योति को निखराता।।

44 ( मूलश्लोकः )

आत्मा तु सततं प्राप्तोऽप्यप्राप्तवदविद्यया।
तन्नाशे ग्रासवद् भाति, स्वकराभरणं यथा।।

( भावार्थः )

वास्तविक तत्त्व दृष्टि से विचारवान् बनो,
आत्मा की नित अनुभूति होती।
अनादि अविद्या अविचारी की,
आत्मा सदा अप्राप्त ही लगती।
गुरुकृपा से महावाक्य का,
ज्ञान उदय जब होता है।
नाश अविद्या का होते ही,
पुनः स्मृति में आता है।।

क्रमानुसार....

पूर्व-अतिरिक्तनिदेशक :
आयुर्वेदविभागः, राजस्थानम्
दूरभाष : 9829410781

# योगः कर्मसु कौशलम्

❑ डॉ. नानूरामजाटः

**योगः**- 'योग' शब्दः युज् धातुना घञ् प्रयये योजिते सति सिद्ध्यति। अस्यार्थः समाधिः योजनं संयमनं वा भवति। पतञ्जलिमहाभागेन उक्तम् ''योगश्चित्तवृत्ति-निरोधः'' (यो.द. 1.2)

**गीतायामुक्तं :-**

''**योगः कर्मसु कौशलम्**'' (गीता **2**.50) योगः कार्येषु कुशलतां प्रकटयति। यदा मनसा बुद्ध्या एकाग्रतया स्वार्थं विना कर्म क्रियते तदा कार्येषु कुशलता भवति।

योगस्य अर्थोऽस्ति स्वचेतनायाः बोधः। अन्तर्हित-शक्तीनां विकासम् कृत्वा परमचैतन्य आत्मनः साक्षात्कारः पूर्णानन्दस्य प्राप्तिः। स्व शब्दस्य अर्थोऽस्ति-आत्मा। शब्दोऽयं देहेन्द्रियप्राणमनसोश्च जीवात्म-परमात्मनोश्च कृते प्रयुक्तो भवति।

अद्य समग्रं विश्वमपि योगस्य महत्त्वं स्वीकरोति। योगविद्या मूलतः भारतीयविद्यैवास्ति। जनाः बाल्य-कालादेव जागरूकाः भूत्वा योगाधारितजीवनस्य निर्माणं कुर्युः इति अस्माकमुद्देश्यम्। योगः जीवनदर्शनमस्ति। योगः आत्मानुशासनमस्ति। योगो विज्ञानमस्ति। योगस्य सम्बन्धः न केवलं शरीरविज्ञानेन अपितु सर्वविषयैः सह वर्तते। योगेन जीवनदृष्टिः लभ्यते, योगेन लोकः स्वस्थ-जीवनं प्राप्नोति। सुस्वास्थ्यम् एव सम्पूर्णसुखानां आधारोऽस्ति योगपथस्य अवलम्बनेन शारीरिक-मानसिक, बौद्धिकीमाध्यात्मिकीञ्च उन्नतिं प्राप्नुवन्ति।

**स्वस्थजनस्य परिभाषा** - स्वस्थः कः अस्ति? आचार्य**सुश्रुत**महोदयानुसारम् स्वस्थस्य परिभाषा-निम्नानुसारमस्ति-

**''समदोषः समाग्निश्च समधातुमलक्रियः।**
**प्रसन्नात्मेन्द्रियमनाः स्वस्थ इत्यभिधीयते।।''**

(सुश्रुतसंहिता, 15/41)

यस्य जनस्य वातपित्तकफाश्च समाः समाग्निश्च (जठराग्नि) सप्तधातुः रसरक्तमांसमेदास्थिमज्जावीर्यश्च समो भवति, एकादश इन्द्रियाणि प्रसन्नानि सः जनः स्वस्थ इति अभिधीयते।

अस्माकं भारतीयसंस्कृतौ धर्मार्थकाममोक्षाः इति पुरुषार्थचतुष्टयम् इति उल्लेखः वर्तते।

तेषु प्रथमस्य पुरुषार्थस्य सिद्ध्यर्थं प्रमुखं साधनं शरीरमेवास्ति। उक्तमपि 'शरीरमाद्यं खलु धर्मसाधनम् इति।' एवमपि वक्तुं शक्यते यत् पुरुषार्थानां पूर्वं स्वस्थ शरीरस्य आवश्यकता वर्तते। अस्माकं ज्ञानेन्द्रियाणां-कर्मेन्द्रियाणां च स्वस्थता भवेत्। यदि अस्माकं शरीरं मनः चित्तं बुद्धिः इत्यादयः स्वस्थाः भविष्यन्ति तर्हि अस्माकं स्वास्थ्यं सम्यक् भविष्यति। स्वस्थशरीरे स्वस्थ-मस्तिष्कस्य निवासः भवति। स्वस्थेन शरीरेणैव मानवः सर्वाणि कार्याणि समुचितरूपेण करोति। शरीरं स्वस्थं कथं भवति-गीतायां उक्तम्-

**''युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु।**
**युक्तस्वप्नावबोधस्य योगो भवति दुःखहा।।''**

(गीता, 6/17)

यस्य आहारविहारव्यवहाराश्च सन्तुलिताः संयमिताश्च भवन्ति। यस्य कार्येषु दिव्यता मनश्च पवित्रं भवति। यस्य शयनं जागरणं च नियमितं अस्ति। सः योगी वर्तते।

आहारेण जनानां शरीरस्य निर्माणं भवति।

''**आहारशुद्धौ सत्त्वशुद्धिः ध्रुवा स्मृतिः, स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्षः।।** (छान्दोग्योपनिषद्, 9.26) **अस्माकं शरीरस्योपरि आहारविहारस्य प्रभावः भवति।''**

अद्य जनाः स्वास्थ्यरक्षणार्थं विभिन्नान् प्रयत्नान् कुर्वन्ति। प्रायशः उच्यते यत् भारतीयदर्शने जीवनस्य धर्मार्थकाममोक्षाः इति चतुष्टयपुरुषार्थानाम् उल्लेखः वर्तते। पुरुषार्थचतुष्टयप्राप्तये मनुष्याणां स्वस्थं दीर्घायुः परमावश्यकम्। दीर्घायुजीवनस्य आकांक्षा मनुष्यस्य आदिकालात् एव अस्ति।

''**पश्येम शरदः शतं जीवेम शरदः शतं शृणुयाम**
**शरदः शतं प्रब्रवाम शरदः शतमदीनाः स्याम**
**शरदः शतं भूयश्च शरदः शतात्।।''**

(शुक्ल यजु. अध्याय 26/24)

केवलम् शरीरानुशासनेन दीर्घकालपर्यन्तं शरीरं स्वस्थं न तिष्ठति। अतः शरीरस्वास्थ्यस्य रक्षणार्थं प्रमुखः वर्तते योगः।

अस्माकं संस्कृतौ साहित्ये च पञ्चकोशात्मक-विकासस्य अवधारणा वर्तते। शरीरं प्राणाः मनः बुद्धिः आत्मा च पञ्चकोशानां साधनानि। यदा एतेषां सर्वेषां साधनानां एकस्मिन् समये उपस्थितिः साधारणयोगः भवति। अर्थात् यदा मनुष्यः एकाग्रचित्तः भूत्वा समानरूपेण एतान् साधयितुं प्रयत्नं करोति तदा साधारणयोगस्य स्थितिः भवति। गीतायाम् उक्तम्-

''**योगस्थः कुरु कर्माणि संगं त्यक्त्वा धनञ्जय।**
**सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते।।''**

(गीता 2.48)

हे धनञ्जय आसक्तिं त्वक्त्वा समो भूत्वा योगे स्थित्वा स्वकर्त्तव्यं कुरु, यतः समत्वं योग उच्यते।

**योगस्योपयोगिता**- अद्य विश्वेन योगस्य महत्त्वं स्वीकृतमस्ति। सम्पूर्णविश्वे **जूनमासस्य एकविंशतितमे** दिनांके **योगदिवसः** आयोज्यते। नियमितरूपेण योगाभ्यासेन शरीरावयवाः दृढा भवन्ति। योगेन शरीरं स्वस्थं रोगरहितं च भवति। मनः स्थिरं प्रसन्नञ्च भवति। बुद्धिः तीव्रा भवति। मानसिकविकाराः दूरे जायन्ते। सांसारिकव्यवहारेऽपि शुद्धिर्जायते। बुद्धेश्च विकासो-भवति। योगाभ्यासेन आत्मसाक्षात्कारः परमात्म-साक्षात्कारः च भवति। योगाभ्यासेन आन्तरिक-द्वन्द्वानामुपरि विजयं प्राप्नोति। चञ्चलमानसं एकाग्रताम् प्राप्नोति। परं अष्टांगयोगनामा योगः बहुप्रचलितोऽस्ति। योगस्य अष्टांगानि सन्ति-

''**यमनियमासनप्राणायामप्रत्याहार-धारणाध्यान**
**समाधयोऽष्टावंगांनि।।''** (योग द. 2. 29)

**1. यमः** यम्यन्ते उपरम्यन्ते हिंसादिभ्य इन्द्रियाणि यैस्ते यमाः। यम शब्दः 'यमु उपरमे धातोः निष्पन्नः।' 'अहिंसा-सत्यास्तेय ब्रह्मचर्यापरिग्रहाः यमाः' (यो. द. 2.30)

(क) **अहिंसा** – न हिंसा इति अहिंसा।

तत्राहिंसा सर्वथा सर्वदा सर्वभूतानामनभिद्रोह (व्यासभाष्य यो.द.)

(ख) **सत्यम्**- सत्यं यथार्थे वाङ्मनसी। यथादृष्टं यथानुमितं यथाश्रुतं तथा वाङ्मनश्चेति।

परत्र स्वबोधसङ्क्रान्तये वागुक्ता सा यदि न बाधिता भ्रान्ता वा प्रतिपत्तिवन्ध्यां वा भवेदिति।

एषा सर्वभूतोपकारार्थं प्रवृत्ता न भूतोपघाताय।

**2. नियमः**

''**शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः**'' (योग. द 2/32)

**( क ) शौचः** -

शौच शब्दस्य अर्थोऽस्ति, शुद्धिः पवित्रता च। अद्भिर्गात्राणि शुध्यन्ति मनः सत्येन शुध्यति। विद्यातपोभ्यां भूतात्मा बुद्धिर्ज्ञानेन शुध्यति।। (मनुस्मृति 2/109)

**( ख ) सन्तोषः** - सन्तोषमूलं हि सुखं, दुःखमूलं विपर्ययः, सुखस्य मूलाधारः सन्तोषः अस्ति। तस्य विपरीतं तृष्णालालसा दुः खानां मूलाधारः अस्ति।

**( ग ) तपः** ''तपो द्वन्द्वसहनम्''

**( घ ) स्वाध्यायः** प्रणवादिपवित्राणां जपो मोक्ष-शास्त्राणामध्ययनं वा।

**( ङ ) ईश्वर-प्रणिधानम्**- तस्मिन् परमगुरौ सर्व-क्रियाणामर्पणम्। परमपितुः परमेश्वरस्य समीपे स्व समस्तकर्मणामर्पणं।

**( 3 ) आसनम्**

''स्थिरसुखमासनम्।'' यो. द. 2/46 पद्मासन-भद्रासनसिद्धासन-सुखासनं चेत्यादयः 84 आसन-प्रकाराः मन्यन्ते।

**( 4 ) प्राणायामः**-

''तस्मिन् सति श्वासप्रवासयोर्गतिविच्छेदः प्राणायामः।'' (यो.द. 2.49)

प्राणगतिनिरोधः प्राणायाम उच्यते।

**( 5 ) प्रत्याहारः** बहिरंगअन्तरंगयोगयोः संधिः प्रत्याहारः।

स्वविषयासम्प्रयोगे चित्तस्वरूपानुकार इवेन्द्रियाणां प्रत्याहारः (यो.द. 2.54)।

साधकः विवेकवैराग्याभ्यां स्वमनसः उपरि नियन्त्रणं करोति। तदा इन्दियेषु विजयः स्वयं भवति ततः परमावश्यतेन्द्रियाणाम्।

**( 6 ) धारणा**

''देशबन्धश्चित्तस्य धारणा (यो.द.39)''। चित्तस्य स्थानविशेषे बंधः धारणा भवति।

**( 7 ) ध्यानम्** चित्तस्य एकाग्रता। मनसः निर्विषयीकरणं ध्यानं भवति।

''तत्र प्रत्ययैकतानता ध्यानम्'' (यो.द. 3.2)

**( 8 ) समाधिः** - समाधि शब्दस्य अर्थोऽस्ति ''पूर्ण एकाकारः''

ध्याने यदा ध्येयो भासते तथा स्वस्य स्वरूपं शून्यं भवति, सा स्थितिः समाधिः भवति ''तदेवार्थ-मात्रनिर्भासं स्वरूपशून्यमिव समाधिः'' (यो.द. 3.3)

**वर्तमानपरिप्रेक्ष्ये**- योगस्याभ्यासः अस्माभिः करणीयः। सूर्यनमस्कारमाध्यमेन योगासनानां प्रारम्भः करणीयः। सूर्यनमस्कारस्य द्वादश स्थितयः सन्ति। तस्य द्वादशमन्त्रैः अभ्यासस्यापि स्वरूपं दृश्यते समाजे।

योगासनानां क्रमबद्धनियमिताभ्यासेन च भवति पञ्चकोशात्मकः विकासः। अद्यतनदिनचर्यायां किंचित् समयः योगाभ्यासस्य कृते भविष्यति 'तर्हि सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः' इति विश्वमंगलकामना सफला भविष्यति।

**अध्यापकः संस्कृतशिक्षाविभागे**
**राज.उ.प्रा.संस्कृतविद्यालयः, माताजी**
**भोपावास ( जयपुर )**

# विनायकसहस्रसिद्धे

( गताङ्कादग्रे )

❑ पं. राजेन्द्रमोहनशर्मा

शनैः शनैः सन्ध्या समधिकश्यामा जाता। अन्ते विनायको निश्चयमकरोत् किमपि स्यात्। एषा सुरक्षिततरूपेण राजप्रासादे प्रापणीया एव। तत्रास्याः परिचर्या उपचारश्च भवितुं शक्नोति। विनायको मन्दिरात् बहिरागत्योच्चस्वरेणावदत् उच्चैः श्रवा-कुत्रास्ति भवान्? विनायकश्चाश्वतीव्रं धावन् मन्दिरस्य मुख्यद्वारसम्मुख-मतिष्ठत्। विनायक एवास्य पृष्ठं हस्तेन पस्पर्श। अवदच्च मित्र! एकवारं पुनः राजप्रासादं यावत् चलित्वा गमिष्यावः। भवानत्रैव तिष्ठतु। अहमभ्यन्तरं गत्वा-आगच्छामि। विनायकस्तीव्रगत्या मन्दिरे प्राविशत् स्वकीयदृढस्कन्धेषु कुमारीं संस्थाप्याश्वपृष्ठे तामारोप्य स्वयं चोत्प्लुत्याश्वे उपाविशत्। किञ्चित् क्षणेष्वेवाश्वो राजप्रासादस्य मुख्यद्वारे समुपस्थितोऽभवत्। अद्यैक-श्चमत्कारोऽयमप्यभूत् यदुच्चैःश्रवा राजप्रासादस्य पिहितेभ्य मुख्यद्वारेभ्यः स्वगत्या मत्या च पारमगच्छत्। अर्थात् विनायकोऽचिन्तयत् पिहितद्वारेभ्यः पारं कथं गन्तव्यम्?

विनायकोऽवतीर्य शनैः कुमारीमुत्थाप्य तां राजप्रासादात् बहिरशाययत्। स विचारं कुर्वन्नेवासीत् यत् कुमारी राजप्रासादाभ्यन्तरे कथं प्रापयितव्यां तावत् काश्चन परिचारिकाः अन्याः कुमारिकाश्च परिहासं कुर्वन्त्य अस्यामेव दिशि आगच्छन्तीत्यपश्यत्। विनायकः शीघ्रं कस्यापि वस्तुनः पृष्ठे उदतिष्ठत्। प्रासादस्य मुख्यद्वारात् बहिः शयितां कुमारीं दृष्ट्वा ताः सर्वाः स्तब्धाः संजाताः कुमारीं तथाभूतां दृष्ट्वा कोलाहलः संजातः। किं जातम्? कथमियं मूर्च्छिता जाता? एषा तु मन्दिरेऽगच्छत्। अत्र कः इमामानयदित्यादिप्रश्नाः समुत्पन्ना आसां मनस्सु। तदैव-एका कुमारी स्वोत्सङ्गे तस्याः शिरः स्थापयित्वा शिरसि हस्तं संस्थाप्यावदत् बुद्धि! किं जातम्? त्वं स्वस्थासि न वा? कथं न वदसि? सा स्वीयाञ्चलेन तां संवीज्य मुखे जलं प्राक्षिपत् तदनन्तरं स्वकीयवेण्यां संलग्नं पुष्पं त्रोटयित्वा तस्या मुखे बिन्दुद्वयं प्राक्षिपत्। मूर्छिता कुमारी नेत्रे उद्घाट्य परितः सहचरीगणं दृष्ट्वाऽऽश्चर्ये न्यपतत्। व्यपगतमूर्च्छां कुमारीं दृष्ट्वा सर्वाः सख्यः परिचारिकाश्च सन्तोषमन्वभूवन्। परन्तु विनायकाय सैषा रहस्य पूर्णा प्रहेलिका जाता। यतोहि स यां सिद्धिममन्यत तस्याः सख्यस्तां बुद्धीत्यकथयन्।

बालविनायकः स्वसखाभिः सह सम्पूर्णे आश्रमे सशब्दं क्रीडतिस्म यः कोऽपि तस्य सम्मुखे समायातिस्म स कन्दुकेन तमताडयत्। आश्रमवासिनः ऋषिपुत्राः कन्यकाश्च तस्य बालसखाय आसन्। बाल्ये एव विनायकः स्वदलस्य स्वघोषितनेतृत्वे आनन्दमन्वभूत्। स ज्येष्ठानपि बालकानादिशत् निर्देशं दत्वा पालनाय विवशानकार्षीत्। यः कोऽपि निर्देशानामवहेलनाम-करोत् तस्य कुशलता नासीत्। कार्तिकस्तु सदैवाकथयत् परेष्वादेशं विहाय विनायको न किमपि कर्तुं शक्नोति। मातुः पार्श्वे भोज्य-सामग्रीविभाजनकालो भवेत् अथवा क्रीडाङ्गणे क्रीडाकार्यं प्रदानावसरः स्यात् प्रत्येकस्मिन् कार्ये स्वेच्छितमेव निर्णयमकारयत्। अनवलोकनं तिरोहितभवनक्रियात्मिका-क्रीडायां तु कन्दुकं सर्वदैव विनायकस्य हस्ते एव शोभतेस्म। भोजनस्थाल्यां मोदकसमूहो विनायकभागे एवाधिको भवेत्। दुग्धनवनीतभक्षणे तु विनायकः सर्वेभ्योऽग्रेसरो जायते।

प्रतिदिनवदद्यापि विनायकः स्वसहचरानादिशत् गुरोरध्यापनं पूर्णं संजातम्। अधुना वयं क्रीडितुं चलामः। सहचराः प्रार्थयामासुः पूर्वं वयं पठितं पाठं स्मरिष्यामः। भवन्तस्तु कुशाग्रबुद्धिमन्तः। एकवारं श्रुतं पाठं प्रयत्नं विनैव द्वितीयं बारं यथावत् प्रस्तुवन्ति। तदैव विनायकस्य क्षीणकायः एकः सहचरोऽवदत् वयं विनायकस्य धूर्ततां जानीमः। गुरवः पाठं पाठयन्ति एष च वृक्षाणां त्वचासु यथावदुल्लिखति। यदा गुरवः पृच्छन्ति तदा एष स्वनेत्रे परिभ्राम्य वृक्षेषु लिखितान् मन्त्रान् यथावत् पठति। गुरवश्चास्मै धन्यवादान् प्रयच्छन्ति। वयं च ताडिता भवेम। विनायक उच्चैर्जहास अकथयच्च भवन्तोऽपि तान् मन्त्रान् पठितुं शक्नुवन्ति। सः कृशकायः सहचरः क्रुद्धोऽभवत्। अरे त्वया लिखितं नान्यः पठितुं शक्नोति। अहं स्मरामि एकस्मिन् दिने कुमार आशवः तव धूर्ततां गुरवे न्यवेदयत् तदा गुरवः स्वयं येषु वृक्षेषु भवानलिखत् तेषां परिक्रमामकुर्वन्। ततः गुरवोऽपि भवते न किमप्यकथयन् अपितु आशवमेवाताडयन् अवदच्च यदि मिथ्याभाषणं विधास्यति तदाहं ताडयिष्यामि। विनायकः प्रतिभा-सम्पन्नः भाविपण्डितो विद्यते। गुरुकृतप्रशंसया त्वहङ्कारयुक्तः संजातः गुरोर्गमनानन्तरं क्रीडायां होरात्रयं यावदाशवं असफलमेव क्रीडाकर्मणि योजयामास। अन्ते च श्रान्तः स क्रीडाङ्गणे समुपविश्य क्षमामयाचत तदैव भवान् तमत्यजत्। **( प्राचार्य )**

**पुरानी बस्ती, चांदपोल बाजार, जयपुर**

# सूक्ति-सुधा

(आचार्यसकलकीर्तिरचितसुभाषितरत्नावलीतः)

❑ **डॉ. प्रेमचन्द्र रांवका**

**विस्मृतं पतितं नष्टमदत्तं बुधनिन्दितम्।**
**धनधान्यादिसर्वं च परस्वं त्यज सर्वदा।।**

- जो भूला हुआ हो, गिरा हुआ हो, नष्ट हुआ हो, बुद्धिमानों द्वारा निन्दित हो, बिना दिया हुआ हो, ऐसा धन धान्यादि पर पदार्थ सर्वदा छोड़ो।

**परद्रव्यं समादत्ते यो मूढो वञ्चनादिभिः।**
**स्थितं तस्य गृहाद्याति दारिद्र्यं सन्मुखायते।।**

- जो मूर्ख मनुष्य धोखे से दूसरे के धन को लेता है, उसका घर में स्थित धन भी चला जाता है और दरिद्रता उसके सन्मुख आ जाती है।

**परद्रव्यमतिस्तोकं यो गृह्णाति स तस्करः।**
**वधबन्धादिकं प्राप्य श्वभ्रं गच्छति दुर्मतिः।।**

- जो दुर्मति (दुर्बुद्धि) मनुष्य दूसरों के अत्यन्त अल्प धन को भी ग्रहण करता है वह चोर है वह वध-बन्धादिक को प्राप्त कर नरक जाता है।

**सत्याचरणाल्लक्ष्मीः स्वयमप्यायाति पुण्ययुक्तस्य।**
**असदाचारस्य पुनः स्थिता चापि विनश्यति।।**

- सत्य आचरण से पुण्यात्मा जीव को लक्ष्मी स्वयं ही प्राप्त होती है और असद् आचरण से घर में स्थित भी लक्ष्मी नष्ट हो जाती है।।

**सकलविबुधनिन्द्यं दुःखसंतापबीजं,**
**विषमनरकमार्गं बन्धविच्छेदहेतुम्।**
**कुगतिकरमसारं पापवृक्षस्य कन्दं,**
**त्यज सकलमदत्तं त्वं सदा मुक्तिहेतोः।।**

- समस्त बुद्धिमानों के द्वारा जो निन्दनीय है, दुःख और संताप का मूल कारक है, विषम नरक का मार्ग है, बन्ध और नाश का कारण है, कुगति को करने वाला है, असार है, पाप रूप वृक्ष का समूह है, ऐसे समस्त अदत्त वस्तु (बिना दिये हुए) को मुक्ति प्राप्ति हेतु तुम छोड़ो।

**पूर्व आचार्यः**
**22, श्रीजीनगर, दुर्गापुरा, जयपुरम्-18**

# प्राकृतव्याकरणेषु संस्कृतव्याकरणस्य प्रभावः

❑ आभा जैन

व्याक्रियन्ते व्युत्पाद्यन्ते शब्दाः यत्र तन्नाम व्याकरणशास्त्रं कस्याश्चिदपि भाषायाः कलेवरं चिरञ्जीविकर्तुमलं भवति यतोहि व्याकृतैः संज्ञासर्व-नामादिस्वरूपैः क्रियात्वद्यौतकैः स्त्रीपुंनपुंसकलिङ्ग-लिङ्गितैः कृत्तद्धितसमासादिविविधरूपेषु च व्युत्पादितैः शब्दैः सन्धिमापन्नैर्विपन्नैर्वा सर्जनशीलशास्त्रप्रणेतारो वै सुविचारकाः विविधविद्योपेतं साहित्यं समाजस्य दर्पणमिव चित्रयन्ति शब्दार्थयोः वाच्यवाचकत्व-बोधबलादिति निश्चप्रचम्। वाच्यवाचकत्वबोधार्थं तु व्याकरणशास्त्रमुपकारि भवत्येवेति ज्ञायते। तद्धेतोरेव शास्त्रेषु लोके वा सुप्रयुक्तं भाषातत्त्वं समीचीनतां भजते नियंत्रितञ्च सत्शुद्धं सुविशदं व्यापकञ्च सर्वलोकानेव यथायथमवबोधयितुमलं भवति। साहित्यपाथोनिधिरेव भाषाशास्त्रग्रन्थिं समुद्धाटयति तत्र निगृहीतं वा धर्मदर्शनेतिहासादितत्त्वं समाजसंस्कृत्यादिमूल्येन सह किञ्चिदिव न प्रकटीकरोतीति वक्तुं शक्यते।

सुविदितमेव तथ्यमिदं यद्विश्वस्य सर्वासु भाषासु संस्कृतभाषायाः व्याकरणं सर्वातिशयं महत्त्वं भजते। तत्रापि पाणिनीयं व्याकरणं खलु भारतस्य नैकासु भाषासु स्वकीयं प्रभावमपि द्योतयतीति। उक्तञ्च–

**''समुद्रवद्व्याकरणं महेश्वरे,**
**तदर्धकुम्भोद्धरणं बृहस्पतौ।**
**तद्भागभागाच्च शतं पुरन्दरे**
**कुशाग्रबिन्दूत्पतितं हि पाणिनौ।।''**

भाषावैज्ञानिकतत्त्वानुसरणिमनुसृत्य कस्याश्चिदपि भाषायाश्च सदध्ययनं विधातुं व्याकरणस्य महत्त्वं सुस्पष्टं प्रतिपादयन्तो भाषावैज्ञानिकाः विद्वांसो वदन्ति यत्पाणिनीयं व्याकरणं विश्वस्मिन्नपि जगतीदानीं प्रायो विश्वस्य सर्वानपि व्याकरणग्रन्थानतिशेते।

वैयाकरणाः हि प्रथमे विद्वांसः व्याकरणं तु मुखं स्मृतमित्यादिवाक्यसम्पदा व्याकरणशास्त्रस्य यथा महत्त्वं संस्कृतवाङ्मये स्वीकृतं वर्तते न तथा प्राकृते वाङ्मये स्वीकर्तुं शक्यते व्याकरणादिसंस्कारचिन्ताऽनपेक्षित प्राकृतस्येति। प्राकृतिकोऽयं नियमो यत्प्रकृतिस्वरूपाः साधारणजनाः भाषन्ते यदा तदा न तैः व्याकरणादि-नियमादिकमनुसृत्य भाष्यते। अपितु जनाश्च प्रयुञ्जन्ते शब्दादिकं यथा तथैव तेषामङ्गीकारो व्याकरणे विधीयते तत्र साधुत्वासाधुत्वदिशापि प्रयत्नः तैर्विधीयते। वस्तुतः शब्दादिभिरर्थबोधकरणमेव भाषामूलं प्रयोजनं भवति। व्याकरणशास्त्रं खलु न तत्प्रयोजनं बाधतेऽपितु सौकर्य्यमेव पुरस्करोति तत्रेति कृत्वा व्याकरणशास्त्रस्य व्यापकत्वमेव स्वीक्रियते विद्वत्तल्लजैरिति। शब्दानां साधुत्वासाधुत्वप्रदर्शनमेव व्याकरणस्य लक्ष्यं न स्यात् किन्तु तेन सहैव लोके शास्त्रे वा सुप्रयुक्तानां शब्दानामुपरि विमर्शनमपि भवेदिति कृत्वा व्याकरणे स्वीकृतमस्ति यदुत्तरोत्तराणां मुनीनां प्रामाण्यमिति, नो चेदेवं, भाषायाः विकासोऽवरुध्यते। विकासमस्पृशन्ती च भाषा काऽपि स्यान्मृतैव भविष्यतीति। कुतः स्यात्तद्भाषायां साहित्यसृष्टिः लोकव्यवहारो, वा? नैव स्यादिति व्याकरणं किं करिष्यति साम्प्रतमपि संस्कृते भवत्येव साहित्यसर्जनं लोकव्यवहारोऽपि बहुलायते ततो न संस्कृतभाषा विकासमस्पृशन्तीति वक्तुं शक्यते।

प्रकृष्टो भावः प्रभावः। परस्परं कृष्टेन प्रकर्षेण वा भावः सत्ता परिणामो वा ययोः येषां वा यत्र समाकल्यते तत्र परिज्ञायते प्रभावः। सः खलु भवितुमर्हत्यनुकूलः। भारतीयसंस्कृतौ संस्कृतप्राकृतभाषयोः परस्परं प्रभावः दरीदृश्यत एव तदुभयोः सुप्रयुक्तत्वात् संज्ञालक्षणादिभिस्तत्र भेदे सत्यपि प्रयोजनदिशा भेदो नास्तीति वक्तुं शक्यते।

प्रत्येकमपि भाषा विविधसांस्कृतिकसामाजिकमूल्यानां धर्मदर्शनादिसिद्धान्तानाञ्चानेकेषां संवाहिकैव भवति। संस्कृतप्राकृतभाषयोर्विविधानि बहूनि च धर्मदर्शनसंस्कृतितत्त्वानि लभ्यन्ते ततो नैवं प्रवादो भवेद्यत्संस्कृतं खलु ब्राह्मणानामेव भाषा प्राकृतं तु जैनानामेवेति। भाषा तु सर्वेषामेव भवति न खलु संस्कृतप्राकृतभाषे अपि ह्यत्रापवादतया ग्राह्ये। तदनन्तरं हि तदुभयोः प्रभावकलनं शक्यं स्यात्। लेखेऽस्मिन् किञ्चिदिव व्याकरणदिशा प्रयत्नो विधीयते।

व्याकरणशास्त्रविनिर्मितदिशा संस्कृते प्राकृतस्य प्रभावः प्राकृते वा संस्कृतस्येति न संशयास्पदं ज्ञेयं किन्तु प्राकृतव्याकरणशास्त्रस्य प्रादुर्भावः संस्कृतप्रभावादेव सञ्जातः। संस्कृतज्ञानां कृते संस्कृतज्ञैरेव व्याकरणादिसंस्कारनिर्वहणचिन्ताशून्यसहजतयैव च जायमाना प्राकृतभाषा यदा ग्रन्थभारं निर्वोढुं समर्था सती साहित्यपाथोनिधिस्वरूपाऽभविष्यत्तदा व्याकरणादिसंस्कारचिन्ताग्रस्ताऽप्यभविष्यदिति ज्ञायते। तद्विना साहित्यं कथं प्रभवेत्? एवं खलु प्राकृतवाङ्मयोऽपि न स्यात् व्याकरणादिसंस्कारचिन्ताशून्यः सर्वथेति वक्तुं शक्यते। व्याकरणचिन्ताशीलत्वात्तत्रापि व्याकरणशास्त्रस्यावश्यकता स्यादतः प्राकृतव्याकरणानां प्रादुर्भावो यथाकालमभूदिति ज्ञायते। **भरतमुनिना** स्वयं नाट्यशास्त्रेऽष्टादशपद्यैः प्राकृतभाषामनुसृत्य व्याकरणविषयकाः क्वचित्सिद्धान्ताः संसूचितास्तेषामुदाहरणान्यपि चाग्रे प्रदर्शितानीति ज्ञेयम्। नाट्यशास्त्रीयवृत्तमेतद् पर्याप्तमेवातिसंक्षिप्तत्वं तस्मात्शब्दानुशासनदिशा व्याकरणविषयकशास्त्राणि प्राकृतभाषायाः कृतेऽपि। तत्र समुपलब्धाः त्रयो व्याकरणग्रन्थाः प्रमुखायन्ते। तद्यथा-

1. **प्राकृतलक्षणेति** नाम्ना ख्रिस्ताब्दस्य द्वितीये तृतीये वा शतके चण्डविरचितो व्याकरणग्रन्थः।

2. **प्राकृत-प्रकाश** इति नाम्ना वररुचिविरचितः ग्रन्थः। वररुचिः कदा जात इति नैव निर्णीतं वर्तते तथापि केचन मन्यन्ते पाणिनीयकालिकविक्रमराज्यसमानकालिकश्चेति। डॉ. नेमिचन्द्रशास्त्रिमहोदयस्य मतं वर्तते यत्प्राकृतप्रकाशे चण्डनिरूपितविषयाणां कतिपयानां विस्तरशो विवेचनं लभ्यते ततो वररुचिस्तदुत्तरवर्ती प्रतीयते। प्राकृतप्रकाशस्य प्राचीनाः चतस्रः टीकाः समुपलभ्यन्ते। यथा- भामहस्य मनोरमा कात्यायनस्य प्राकृतमञ्जरी बसन्तराजस्य प्राकृतसंजीवनी सदानन्दस्य सुबोधिनीति।

3. **सिद्धहेमशब्दानुशासनम्** खलु हेमचन्द्रप्रणीतो विशालकायो हि व्याकरणग्रन्थो वर्तते। अत्र सप्तस्वध्यायेषु संस्कृतभाषाया व्याकरणमेव निभाल्यते ग्रन्थकारेण, प्राकृतापभ्रंशव्याकरणसूत्राणि तावदष्टमेऽध्याये चतुष्पादसमन्विते वर्तन्ते। अस्य चास्ति स्वोपज्ञवृत्तिरपि महत्त्वपूर्णा। ख्रिस्ताब्दस्य द्वादशे शतके ग्रन्थोऽयं प्रणीतः।

पुनश्चैतान् त्रीन् व्याकरणग्रन्थानेवाधारीकृत्य केचन व्याकरणग्रन्थाः प्रकाशं नीताः सन्ति। तेषु प्रमुखायन्ते- क्रमदीश्वरकृतः संक्षिप्तसारः, त्रिविक्रमदेवकृतं प्राकृत व्याकरणम् सिंहराजविनिर्मितः प्राकृतरूपावतारः,

रामशर्मतर्कवागीशनिर्मितः पद्यमयः प्राकृत-कल्पतरुरिति।

संस्कृतव्याकरणशास्त्रं यथा सुव्यवस्थितमास्ते न तथा प्राकृतव्याकरणं यतः प्राकृतव्याकरणे ध्वनि-सादृश्यात्संस्कृतशब्दानां प्राकृतभाषानुकूलं परिवर्तनं कथं भवतीति निरूप्यते मुख्यतः।

हेमचन्द्रस्तु 'अथ प्राकृतं' इति सूत्रं विलिख्य सूचित- तवानेव यदिदानीं संस्कृतशब्दानुशासनानन्तरं प्राकृत-शब्दानुशासनं विधीयते। **स्वोपज्ञवृत्तौ** तेन **लिखितं संस्कृतानन्तरं** प्राकृतमधिक्रियते। संस्कृतानन्तरञ्च प्राकृतस्यानुशासनं सिद्धसाध्यमानभेद-संस्कृतयोनेरेव तस्य लक्षणं न देशस्येति ज्ञापनार्थं संस्कृतसमं तु संस्कृतलक्षणेनैव लोकादिति च वर्तते- तेन ऋह-ऋह, लृ-लृ, ऐ-औ ड़, ञ-श-ष विसर्जनीय प्लुतवर्जा वर्णसमाम्नायो लोकादवगन्तव्यः ङ ञौ स्ववर्ग्यसंयुक्तौ भवत एव। ऐदौत् च केषाञ्चित्। कैतवम् कै अवं सौन्दर्यं सौंआरिअं। कौरवाः कौरवाः। तथा अस्वरं व्यञ्जनं द्विवचनं चतुर्थी बहुवचनं च न भवन्ति।

अत्र सुस्पष्टं जातं प्राकृतव्याकरणस्यास्य यत् शब्दानां प्राकृतीकरणं कथं भवतीति। प्राकृतस्यैव प्रभावोऽयं यत्सर्वत्र प्राकृतव्याकरणेऽस्मिन् आशास्त्रपरिसमाप्तेः यावन्ति कार्याणि विधेयानि सन्ति तानि विकल्पेन बाहुलकेन वा ज्ञातव्यानि 'बहुलम्' इति सूत्रवचनात्।

पंडित वेचरदासजीवराजदोशीमहोदयोऽपि लिखितवान् संस्कृतभाषाविदोऽल्पप्रयासेनैव प्राकृत-भाषां शिक्षन्ते इति सुविचार्य हेमचन्द्रोऽष्टमेऽध्याये संस्कृतप्राकृतशब्दयोः परस्परं किमिदं परिवर्तनं कथञ्च भवतीति ज्ञापितवान्। परिवर्तनमिदं परिज्ञाय कोऽपि जिज्ञासुः प्राकृतभाषां सहजतयैवावगन्तुमर्हतीति कृत्वा सूरिरत्र प्राकृतव्याकरणं प्राकृतशब्दानुशासनं वा विहितवान्।

अनेन सुस्पष्टं भवति यत् हेमचन्द्रेण स्वीयप्राकृत-व्याकरणोपरि संस्कृतस्य प्रभावस्त्वङ्गीकृत एव, तथापि तत्रेदं ज्ञातव्यं भवति-प्राकृतभाषा संस्कृतवन्नास्ति संस्कृतानुरागिणश्च प्राकृतानुगुणं परिवर्तनमङ्गीकृत्यैव प्राकृतभाषाविदो भवितुमर्हन्तीति दिक्।

प्राकृतवाङ्मयेऽपि त्रिविधाः तत्समाः तद्भवाः देश्याश्चेति सन्त्येव। तत्र तत्समशब्दानां प्रभावं कलयितुं प्राकृतगाथेयं समवलोकनीया-

**''कल्याणकन्दं पढमं जिणिदं संति,**
**तओ नेमिजिणं मुणिदं**
**पासं पयासं सुगुणिक्कठाणं,**
**भत्तीइ वन्दे सिरीवड्ढमाणं''**

अस्याः संस्कृतच्छायेयं भवति-

**''कल्याणकन्दं प्रथमं जिनेन्द्रम्, सन्ति ततो नेमिजिनं मुनीशं पार्श्वं प्रकाशं सुगुणैकस्थानं भक्त्या हि वन्दे श्रीवर्धमानम्''** उभयत्र सुस्पष्टं ज्ञायते यत्स्वस्वभाषा- प्रकृत्यैव संस्कृतप्राकृतयोः गतिरस्ति। संस्कृतशब्दा एव प्राकृतशब्दा नैव सन्ति प्राकृतशब्दाश्च संस्कृतशब्दाः नोच्यन्ते उभयत्र च सुप्रयुक्ता शब्दा स्वस्वभाषानुगुणमेव शब्दानुशासनमङ्गीकुर्वन्ति तत्कथं व्याकरणशास्त्रदिशा संस्कृतप्राकृतयोः परस्परं प्रभावोऽस्ति न वेति विचार्यताम्।

चण्डकृतप्राकृतलक्षणं नाम प्राकृतव्याकरण-ग्रन्थोऽतिलघुत्वादलं नाभूत्। तत्प्रचारोऽपि नैव जातः वररुचिप्रणीतश्च **प्राकृतप्रकाश** नामधेयो व्याकरण-ग्रन्थः संस्कृतभाषया स्वकीयं प्रमेयं व्यनक्ति तत्रापि व्याकरणीयतत्त्वं प्रकृतानुगुणमेव द्योतते। संस्कृत-व्याकरणवत्स ग्रन्थो नास्ति। तत्र द्वादशस्वध्यायेषु प्राकृतभाषायाः कृत एव व्याकरणमूलकं विवेचनं विधातुं

या खलु पद्धतिरङ्गीकृता वर्तते सा संस्कृतं व्याकर्तुमर्हा नास्ति यतो हि तत्र प्रत्येक- मध्याये क्रमशः अच्विधिः अयुतवर्णविधिः युक्तवर्ण- विधिः संकीर्णवर्णविधिः लिङ्गविभक्त्यादेशः, सर्वनामविधिः, तिङ् विधिः धात्वादेशः, निपात-संज्ञाविधिः, पैशाचिको विधिः मागधाख्यविधिः सौरसेनीसमाख्यविधिश्चेति प्ररूपकानि सूत्राणि सन्ति।

अत्र व्याकरणे संस्कृतस्यायमेव प्रभावः परिलक्ष्यते यदिदं प्राकृतव्याकरणं संस्कृतभाषायां विरचितं वर्तते तत्र तत्समेति संस्कृतशब्दानामुपर्येव मुख्यतया विचारो विहितः। प्राकृतशब्दाः संस्कृतशब्दात् कथं निष्पाद्यन्ते खल्वेतदर्थं हि संस्कृतशब्दानां प्राकृतीकरणं कर्तुं प्रयत्नः द्योत्यते। कथं वर्णपरिवर्तनं जायते कथं च कस्य वर्णस्य स्थाने को वर्णः स्थाप्यः लोपादिविधानञ्च कथं सम्भाव्यते इति प्रतिपादितं वर्तते। भाषावैज्ञानिकसिद्धान्तानुरूपेणैव प्राकृतव्याकरणेषु स्वरलोपो व्यञ्जनलोपः स्वरागमो व्यञ्जनागमः स्वरव्यञ्जनविपर्ययः समीकरणं विषमीकरणं घोषीकरणमभिश्रुतिरतिश्रुतिरित्यादिभिः प्राकृतशब्दाः साधिता भवन्ति। यतो ज्ञायते यत्प्राकृतव्याकरणशास्त्रं संस्कृतज्ञानां कृते प्राकृतभाषां शिक्षयितुं विरचितं संस्कृतप्राकृतभाषयोः वेत्तृभिश्च वैयाकरणैरिति।

प्राकृतव्याकरणेषु कुत्रापि न ज्ञायते यत्प्राकृतशब्दाः संस्कृतप्रभावं स्वीकृत्य संस्कृतशब्दानामिव व्यवहर्तुं शक्याः स्युरिति। 'पुष्पम्' इति संस्कृतशब्दः स्वकीय-संस्कारानुगुणं प्रभावं प्राकृते नैव निक्षिपति तस्य प्राकृतीकरणमेव प्राकृतव्याकरणं निर्दिशति ''ष्पस्य फः'' इति सूत्रेण ष्प स्थाने फ वर्णो विधेयः। 'शेषादेशयोर्द्वित्वमनादौ' इत्यनेन च द्वित्वं विधेयं, ततश्च 'वर्गेषु युजः' पूर्वम् इत्यनेन पूर्वफकारस्य स्थाने पकारो विधेयः। एवं खलु **पुप्फं** प्राकृतशब्दो प्राकृतभाषायां व्यवहार्यो भवति न पुष्पमिति। इदमस्ति संस्कृतस्य पुष्पशब्दस्य प्राकृतीकरणम्।

अत्र प्राकृतव्याकरणोपरि संस्कृतशब्दानां प्राकृतीकरणे प्रभावः परिज्ञायते। ततश्च नैव वक्तुं शक्नुमो वयं यत्संस्कृतप्रभावात्प्राकृतमागतमिति। यतो हि पुष्फ इत्यतोऽपि पुष्पशब्दो निष्पादयितुं शक्यो येन वक्तुं पार्येत खलु पुष्फ इत्यतः पुष्पशब्द आगत इति। प्रभाव-कलनस्य च नोचितो विधिरयम्। प्रभावस्तावत्समाक-लनीयः प्रकर्षभावापेक्षयैव। सत्ताकत्वेन तदविना-भाविपरिणामबलेन चैव भावप्रकर्षो भवति। न चान्धतम-सकल्पनाधारेणैव। काऽपि भाषा कुतोऽपि भाषातो नोत्पद्यते केवलं स्वसामर्थ्यादेव संस्कृतप्राकृतमध्येऽपि केवलमेतदेव तत्त्वं प्रभावकलने ज्ञेयमिति।

विदन्त्येव प्राज्ञा व्याकरणशास्त्रेषु संज्ञाः सन्ति सुबन्ततिङन्तकृदन्ततद्धितेति प्रकरणेषु तन्नियामकानि सूत्राणि प्ररूप्यन्ते। तत्र स्त्रीपुंनपुंसकेति शब्दलिङ्ग-निर्धारणार्थमपि किमपि ज्ञातव्यं भवति। यदि वयं संस्कृतप्राकृतयोर्भाषयोः परस्परं प्रभावमाकलयितुं प्रयासं कुर्मस्तर्हि तत्प्रकरणेषु तदुभययोः साम्यवैषम्यादिकं ह्रासविकासादिकञ्चावश्यमेव विचारणीयं भवेदेव।

तत्र तावत्संज्ञाप्रकरणं प्रथममेवाभिलक्ष्य वक्तुं शक्यते प्राकृतव्याकरणे यदस्ति संज्ञाविधानं तन्नास्ति संस्कृतसमं सर्वथा। यतो हि तत्र तुल्यस्थानप्रयत्नः स्वसंज्ञकः ह्रस्व-हसंज्ञकः, दीर्घो दि संज्ञकः, समासः ससंज्ञकः प्रोच्यते। शषसेति वर्णानां भवति शु संज्ञा, आदि वर्णस्य खु संज्ञा, संयुक्त वर्णस्य स्तु संज्ञा, विकल्पस्य तु संज्ञा बहुलसंज्ञा च, शब्दस्थितद्वितीयवर्णस्य फुसंज्ञा, रेफस्य रित् संज्ञा, व्यञ्जन लोपेऽवशिष्टस्वरस्य उद्धृतसंज्ञेति।

सन्धिविषये तु स्पष्टमेव प्रतिभाति यत्संस्कृतव्याकरणिकविधानं प्राकृततो बहुविकसितं सुविशदञ्च वर्तते। सन्धिनियमः प्राकृतेऽपरिहार्यो न भवति सर्वत्र विकल्पो भवितुमर्हति। समासेऽपि स विकल्पेनैव ज्ञेयः। ज्ञायते खलु प्राकृतभाषायां सन्धिकार्यं संस्कृतप्रभावादेवाङ्गीकृतं स्यात्। संस्कृतशब्दानां प्राकृतीकरणे हि तदधिकायते। प्राकृतभाषानुगुणं संस्कृताद्भिन्नं परिवर्तनादिकमपि तत्र दरीदृश्यते।

स्वरसन्धिषु दीर्घसन्धिः गुणसन्धिश्च मुख्यतया दृश्येते। प्राकृते तु ऐकारस्य औकारस्य चाभावात् अ+ए = ए तथा अ+ओ= ओ इत्येव भवतस्ततो ज्ञायते प्राकृते वृद्धिसन्धिः गुणसन्धिपरिणामस्वरूपैवेति जायते। कुत्रचित् समस्तपदेषु दीर्घस्वरः ह्रस्वो भवति ह्रस्वस्वरो वा दीर्घो भवति। प्रकृतिभावस्वरूपसन्धिस्तु प्राकृते बहुलायते विकल्पहेतोस्तथापि कुत्रचित् शब्देषु कीदृगपि सन्धिकार्यं भवितुं नार्हतीति कृत्वापि प्रकृतिभावसन्धिः ज्ञातुं शक्यते। अव्ययपदानां स्वरैः सह जायमानः सन्धिः वैविध्यं व्यनक्ति तत्र केण-अवि-केण वि, केणावि इत्यादि स्थलेषु संस्कृतानुकूलप्रभावः ज्ञायते किन्तु किम् + अति किं इति अथवा तहा+इति-तहात्ति सन्धिस्थलेषु संस्कृतप्रभावो नास्तीति वक्तुं शक्यते। पुनश्च एस+इमो एसमो (एषोऽयम्) जइ+अहं = जइहं (यद्यहं), अम्हे + एव्व अम्हेव्व इत्यत्र सन्धिकार्येषु संस्कृतप्रभावो नैव परिलक्ष्यते। उद्‌तस्वरः प्राकृते ह्यङ्गीक्रियते। तेन सह सन्धिकार्यं न भवति। यथा रयणी +अरो = रयणी अरो। कुत्रचित् पूर्वस्वरस्य लोप एव भवति यथा राअ +उलं = राउलं (राजकुलम्) मअ+इंदो=मइंदो (मृगेन्द्रः) प्राकृते सर्वत्रैव स्वरसन्धौ अपवादाः बहुलायन्ते तद्व्याकरणशास्त्रं न नियन्तुमर्हं भवति, संस्कृतव्याकरणं तावदपवादादिकं नियन्तुमर्हतीति ज्ञायते।

**सन्दर्भाः -**

1. पाणिनि सूत्रतत्त्वालोकस्य षष्ठपृष्ठतः

2. भोलाशंकर व्यासप्रभृतयः, 3. नाट्यशास्त्रं, 4. तदेव 32 तमे अध्याये 5. अभिनवप्राकृतव्याकरणे, 6. प्राकृतप्रकाशस्य प्रस्तावनायां 7. अभिनवप्राकृतव्याकरणे 8. प्राकृतप्रकाशस्योपोद्धात 9. हेमचन्द्रकृतप्राकृतव्याकरणे 10. सिद्धहेमशब्दानुशासनम्, 11. बहुलम्-तदेव,, 12. द्वितीयः फु, तदेव, 13. रितोद्वित्वलः तदेव, 14. समानानां तेन दीर्घः तदेव, 15. हेमचन्द्रकृत प्राकृतव्याकरणम्, 16. सिद्धहेमशब्दानुशासनं 17. अभिनवप्राकृतव्याकरणम्

**व्याकरणाचार्या**

**ज.रा.राजस्थानसंस्कृतविश्वविद्यालयः, जयपुरम्**

**अनूदितकाव्यम्**

# एकस्मिन् क्षणे

❑ **प्रो. डॉ. मधुसूदनः म. व्यासः**

**अत्र वातावरणं प्राप्स्यसि क्षणैके।**
**प्रवहमानेषु श्वासेषु रोगः सम्मिलितः क्षणैके।।**

**प्रपूरयतु नेत्रयोः स्खलितक्षणस्य नीलस्मरणानि।**
**रक्तप्रवाहे प्रविश्य समयो वञ्चनां करिष्यति।।**

**मनसः सूर्यास्ते बाह्यदृश्यानाम् आन्दोलने।**
**सर्वेषां तृष्णानां नभो गमिष्यत्यस्तं क्षणैके।।**

**अभावेषु कापि विषमघटना स्यात् क्षणैके।**
**विचारे मग्नं मनश्चार्द्रं क्षणैके।।**

**वः उपस्थितिः मां च पृथक् करिष्यति त्वत्तः।**
**सर्वे संप्रेष्यैव स्वजनाः निवर्तिष्ये क्षणैके।।**

**संस्कृताध्यक्षः,**
**विनयन महाविद्यालयः, शामलाजी-383355**
**मो.: 9427693554**

# आध्यात्मिकसुभाषितानि

(मुण्डकोपनिषदः)

❑ डा. नाथूलालसुमनः

**यथोर्णनाभिः सृजते गृह्णते च,**
**यथा पृथिव्यामोषधयः सम्भवन्ति।**
**यथा सतः पुरुषात्केशलोमानि,**
**तथाक्षरात्सम्भवतीह विश्वम्।। - 1-1-7**

(जिस प्रकार मकड़ी [किसी अन्य उपकरण की अपेक्षा न कर स्वयं ही अपने शरीर से अभिन्न] तन्तुओं को रचती है [अर्थात् उन्हें बाहर फैलाती है] और फिर उन्हीं को ग्रहण भी  कर लेती है, तथा जैसे पृथिवी में [व्रीहि यव, वृक्ष आदि समस्त] ओषधियाँ उत्पन्न होती हैं और जैसे जीवित पुरुष से केश और लोम [रोयें] उत्पन्न होते हैं, उसी प्रकार यह विश्व [जगत्] [किसी अन्य निमित्त की अपेक्षा न करने वाले] उस अक्षर ब्रह्म से ही उत्पन्न होता है।)

**भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः।**
**क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे।।**
**- 2-2-8**

(उस परावर [कारणकार्यरूप] ब्रह्म [आत्म-तत्त्व] का साक्षात्कार कर लेने पर उस जीव की हृदयग्रन्थि [अविद्या वासनामय कामनायें] नष्ट हो जाती हैं, सारे संशय [ज्ञेय पदार्थविषयक सम्पूर्ण संदेह] विच्छिन्न [नष्ट] हो जाते हैं और [जिसकी अविद्या निवृत्त होकर संशय नष्ट हो जाते है ऐसे] इस पुरुष के सभी कर्म क्षीण [नष्ट] हो जाते हैं। अर्थात् यह पुरुष मुक्त हो जाता है।)

**द्वा सुपर्णा सयुजा सखाया,**
**समानं वृक्षं परिषस्वजाते।**
**तयोरन्यः पिप्पलं स्वाद्वत्त्य-**
**नश्नन्नन्यो अभिचाकशीति।। - 3-1-1**

(सर्वदा साथ-साथ ही रहने वाले, समान आख्यान वाले [अर्थात् जिनकी अभिव्यक्ति का कारण समान है ऐसे] जीव और ब्रह्म [दो पक्षियों के समान] एक ही शरीररूप वृक्ष पर आलिंगन किये हुए [निवास करते] हैं। उन दोनों में से एक [जीव] तो [अपने कर्म से प्राप्त होने वाले सुख-दुःख रूप] फल को भोगता है और दूसरा [नित्य शुद्ध-बुद्ध-मुक्तस्वरूप सर्वज्ञ ईश्वर] [फल का] भोग न करता हुआ केवल देखता ही है।)

**सत्यमेव जयति नानृतं,**
**सत्येन पन्था विततो देवयानः।**
**येनाक्रमन्त्यृषयो ह्याप्तकामा,**
**यत्र यत्सत्यस्य परमं निधानम्।। - 3-1-6**

(सत्य [सत्यवान्] ही जय को प्राप्त होता है, मिथ्या [मिथ्यावादी] नहीं। सत्य अर्थात् यथार्थ वचन की व्यवस्था से देवयान संज्ञक मार्ग विस्तीर्ण होता है। जिस [सत्य] मार्ग से [कपट, छल, शठता, अहंकार, दंभ और अनृत से रहित] पूर्णकाम और तृष्णारहित ऋषिगण उस पद  को प्राप्त होते हैं जहाँ वह सत्य का परम निधान [भण्डार] विद्यमान है।)

**यथा नद्यः स्यन्दमानाः समुद्रे-**
**ऽस्तं गच्छन्ति नामरूपे विहाय।**
**तथा विद्वान्नामरूपाद्विमुक्तः,**
**परात्परं पुरुषमुपैति दिव्यम्।। - 3-2-8**

(जिस प्रकार निरन्तर बहती हुई [गंगा आदि] नदियाँ अपने नाम-रूप को त्याग कर समुद्र में अस्त [अदर्शन] को प्राप्त हो जाती हैं उसी प्रकार विद्वान् अविद्याकृत नाम-रूप से मुक्त होकर परात्पर दिव्य पुरुष को प्राप्त हो जाता है।)

पुस्तकसमीक्षा

# सुनयना उपन्यासः

❑ म.म. देवर्षिकलानाथशास्त्री
प्रधानसम्पादकः

संस्कृतेऽनेकेषामुपन्यासानां प्रणेतुः, उपन्याससम्राट् इत्यभिधानेन सभाजितस्य पटियाला नगरे सम्प्रति प्रतिष्ठितस्य कथाकारस्य डॉ. महेशचन्द्रशर्मणो ''गौतम'' स्य (महेश गौतमनाम्ना सुविदितस्य) ''सुनयना'' शीर्षक उपन्यासो नवयुगीनं समाजं, नवीनयुगस्य विलक्षणाः प्रवृत्तीश्च चित्रयतीति विशेषोऽस्य। विशालेऽस्मिन्नुपन्यासे **सुनयना** नाम्न्या नायिकायाः कथा समुपनिबद्धा या **मनोहर**नामकस्य युवकस्य प्रेमपाशे समुपनिबद्धा तस्मै विना विवाहमेव स्वात्मानमर्पयति, सुभृशं च स्निह्यति। तदिदं ''लिव इन रिलेशन'' (Live -in-Relation) इति कथयितुं शक्यते। मनोहरः अमरीकायै प्रतिष्ठते। तस्या विवाहः अभिनवनाम्ना युवकेन सह तदनन्तरं विधीयते किन्त्वस्या मानसं परिणेतुरपेक्षया प्रेमिणं प्रत्यधिकमानुकूल्यं स्मरणं च विभर्ति। एकः पुत्रोऽपि प्रसूयते यः स्वपितरं प्रति सुभृशं स्नेहमनुभवति किन्तु सुनयना तथापि परिणेतुः प्रेम्णि नानुरज्यते। केवलं प्रेम्णस्तादृशं बन्धनं तदा वैकल्यं प्राप्नोति यदा सुनयना जानाति यत् अमरीकायामपि मनोहरो युवतीनां कृते प्रेमपाशं प्रचालयति स्म। भारते समायातस्य मनोहरस्य तदा वास्तविकं स्वरूपमवेक्ष्य तस्या मोहभङ्गो जायते - इत्यादयो घटना उपन्यासे साफल्येन वर्णिताः।

एकादश निःष्यन्देषु विभाजितोऽयमुपन्यासः प्रतिपृष्ठं हिन्द्यनुवादेन सह प्रकाशित इत्यस्य विशेषः। प्रत्येकं प्रघट्टकेन सह हिन्द्यामनुवादोऽत्र मुद्रितः। प्रतिप्रघट्टकं कठिनशब्दानां हिन्द्यां परिचयमर्थं च विवृण्वन्त्यष्टिप्यण्योऽपि समाविष्टाः सन्ति। उपन्यासकारस्य शैली प्रौढा, प्राञ्जलसंस्कृतनिबद्धाऽस्ति। विशेषतस्तिङन्तेषु पदेषु पाणिनीया प्रौढिः, प्रायशो लिङन्तलुङन्त क्रियापदानामभिनिवेशे लेखकस्य व्याकरणानुवर्तित्वं स्पष्टीकुरुते। उपन्यासानां प्रणयने डॉ. महेशगौतमस्य नाम विशिष्टं स्थानं बिभर्ति यतो हि ''अरुणा'' ''वैशाली'' ''नीरजा'' इत्यादीनां सामाजिकोपन्यासानां लेखनं प्रकाशनं च कृत्वा विदुषाऽनेनोपन्यासक्षेत्रे स्वकीयमभिज्ञानं स्पष्टतः प्रमाणितमस्ति।

अस्मिन्नुपन्यासेऽपि विख्यातानां विदुषां शुभाशंसनानि संस्कृते, आंग्लभाषायां च द्रष्टुं शक्यन्ते। विद्वन्मूर्धन्यस्य कुलपतिचरस्य सुप्रथितस्य विदुषः डॉ. अभिराजराजेन्द्रमिश्रस्य नान्दीवाक् संस्कृतेऽस्ति, प्रो. देवदत्तभट्टिवर्यस्य पुरोवाक् आंग्लभाषायामस्ति। उपन्यासोऽयं स्वप्रणेतुर्यशः सर्वत्र प्रसारयेदित्याशासानाः सहर्षं वर्धापयामोऽस्य लेखकं डॉ. महेशगौतमम्। डॉ. महेशगौतमवर्यस्य कृते केन्द्रीयसाहित्यअकादम्या संस्कृतभाषायाः पुरस्कारो घोषित इत्येतस्य कृतेऽपि वर्धापयाम उपन्यासलेखकमिमम्।

**सुनयना, ले. डॉ. महेशचन्द्रशर्मा गौतमः, प्रकाशकः निर्मल पब्लिकेशन्स कबीरनगर शाहदरा दिल्ली 44, पृ.सं. 456 मू. 1100/-**

### पत्रिका विशेषाङ्कः

शाहपुरा (जयपुर) स्थेन संस्कृतानुसन्धानसंस्थानेन प्रकाश्यमानायाः ''साहित्यमन्दाकिनी'' पत्रिकाया नवीनोऽङ्कः ''संस्कृतवाङ्मये नारीचेतना'' विषयक-संगोष्ठ्यां प्रस्तुता रचनाः प्रस्तोतुं प्रकाशितोऽस्ति।

नारीमुक्तिप्रभृत्यान्दोलनानि भारतेतरदेशेभ्यः प्रवृत्तानि भारते तु प्राचीनादेव कालान्नारीणामादरः प्रवर्तते, वेदकालान्मध्यकालावधि नार्यः पूज्यन्ते स्म, मध्यकालानन्तरमन्यदेशानां प्रभावान्नार्या गौणता समारब्धा इत्यादीन् विषयान् प्रस्तुवन्तो लेखा अत्र प्रकाशिताः सन्ति। डॉ. सत्यव्रत शास्त्रि-रमाकान्तशुक्ल-राजेन्द्रमिश्र-नारायणकाङ्कर-कलानाथशास्त्रि-माधुरी शास्त्रिप्रभृतीनां, डॉ. शङ्करलालशास्त्रिणश्च लेखनमत्र द्रष्टुं शक्यते।

**साहित्यमन्दाकिनी ( नारीविशेषाङ्कः ) ( सितंबर 2020-मार्च 2021 ), सम्पादकः डॉ. शङ्करलाल शास्त्री, प्रकाशक, राजस्थान ग्रामोत्थान एवं संस्कृत अनुसन्धान संस्था, शाहपुरा ( जयपुर ) मू. 25/- वार्षिकम् 100/-**

# श्रीनटराज-शिवाष्टकम्

## ( सर्वसिद्धिप्रदं स्तोत्रम् )

❑ पं. नथमलशास्त्री दाधीचः

**श्रीवैष्णवानां प्रथमो हि शम्भु-**
**र्यस्तन्त्रशास्त्राखिलतत्त्ववेत्ता।**
**मन्त्रोपदेष्टा हरिभक्तिसिद्ध्यै**
**पूज्यस्त्रिलोकैकगुरुर्गरीयान्।। 1।।**

**अनादिशक्तेरविलुप्तशक्तेः**
**स्वतन्त्रशक्तेः परमञ्च धाम।**
**योगीश्वरं ज्ञानधनं निरीहं**
**सदाशिवं नौमि तमीशमीड्यम्।। 2।।**

**गौरं जटाजूटधरं गभीरं,**
**गङ्गाधरं व्यालविभूषणञ्च।**
**गौरीपतिं स्कन्दगणेशतातं**
**मृत्युञ्जयं त्र्यम्बकमानतोऽस्मि।। 3।।**

**नन्दादिगोपार्चितपादपद्म,**
**व्रजे महादेवमनाथनाथम्।**
**गोपेश्वरं रासरसाभिषिक्तं**
**गोपीस्वरूपं शिवमानतोऽस्मि।। 4।।**

**विश्वेश्वरं तत्पुरुषञ्च रुद्र-**
**मोंकारमूलं गिरिशं गिरीशम्।**
**भस्माङ्गरागं धृतभालचन्द्रं**
**वृषध्वजं नौमि शिवं शिवेशम्।। 5।।**

**शिव शिवशिवमन्त्रः सर्वकल्याणकारी,**
**हर हर हर-मन्त्रः सर्वदुःखापहारी।**
**भव भव भव-मन्त्रो भक्ति-सौभाग्यकारी,**
**शिव हर भव-मन्त्राः, सन्तु सिद्धिप्रदा नः।। 6।।**

**सुरनरमुनिसिद्धैर्योगिभिर्वन्दिताङ्घ्रिः,**
**सकलनिगमगुह्यः शङ्करो मुण्डमाली।**
**परशुपरिघढक्काशक्तिशूलासिहस्तो,**
**भवतु मयि दयार्द्रः पञ्चवक्त्रस्त्रिनेत्रः।। 7।।**

**तं ज्ञानविज्ञानविरागमूर्तिं,**
**विद्याधिपं वेदमयं महेशम्।**
**आनन्दरूपं खलु निर्विकारं,**
**नमामि भक्त्या नटराजराजम्।। 8।।**

**नीलकण्ठो महादेवः कामारिस्त्रिपुरान्तकः।**
**आशुतोषः स्तुतो भक्त्या प्रीयतां मे सदाशिवः।।9।।**

**यज्ञेशो यज्ञभोक्ता च दक्षयज्ञविनाशनः।**
**व्याघ्रचर्माम्बरो देवः प्रीयतां मे सदाशिवः।। 10।।**

**आयुष्कामश्च श्रीकामो विद्याकामस्तथैव च।**
**सिद्धिकामः पठेन्नित्यं स्तोत्रमेतच्छिवाष्टकम्।।11।।**

**छापर ( चूरू )**
**दूरभाष : 9351226660**

नारी-स्तम्भः

# नारी राष्ट्रस्य निर्मात्री

❑ डॉ. राजेश्वरी भट्टः

नारी राष्ट्रस्य निर्मात्री वर्तते। प्रत्येकं नागरिकः तस्या अङ्के पोषणं प्राप्य वर्धते। नारीजागरणं विना राष्ट्रस्य विकासोऽसम्भवोऽस्ति। मुम्बई महानगरे समायोजितायां विशाल-महिला-सभायां लोककल्याणाय धृतजन्मना, दलित, शोषित अभावग्रस्त, समुचिताधिकारवञ्चितानां निर्निमित्त-बन्धुना डॉ. अम्बेडकर महोदयेन नारी सशक्तीकरण -प्रसंगे मुक्तकण्ठेनोद्घाटितेन उदारवचनानि युगयुगेभ्यो मार्गदर्शकानि प्रेरणीयानि च सन्ति। 14 अप्रैल 1891 तमे ख्रिस्ताब्दे मध्यप्रदेशे निम्नकुले जातस्य अलौकिकप्रतिभासम्पन्नस्य अधीतविविध-शास्त्रस्य बहुभाषामर्मज्ञस्य देशाटनेन देशविदेशयोः संस्कृत्या, संस्कारैश्च सुविज्ञस्य महात्मा बुद्ध संतकबीर ज्योतिफुले सदृशानां संविदां जीवनदर्शनेन उदारचिन्तनेन च सन्तुष्टस्य डॉ. अम्बेडकर महोदस्य नारीविषयकं चिन्तनं अतीतस्य प्ररिपेक्ष्ये प्रेक्षणीयं वर्तते। अस्माकं राष्ट्रे नारी वैदिक-कालादेव समाजे सर्वत्र सम्माननीया पुरुषैः सह समानाधिकारसम्पन्ना आसीत्। गृहे परिवारे, समाजे शिक्षासंस्थाने-संगीतनृत्यचित्रादिषु कलासु सर्वत्र नारीणां प्रवेशः सुलभ आसीत्। नारीणां कृते वेदाध्ययनस्य अधिकारोऽपि निषिद्धो नासीत्। गार्गी-मैत्रेयी-लोपामुद्रा-सुलभा सदृश्यो नार्योऽद्यापि राष्ट्रस्य गौरवं वर्धयन्ति। गुरुकुलेष्वपि अनेका ब्रह्मवादिन्योऽध्यापनकार्ये संलग्ना आसन्। शनैः शनैः अपसंस्कृतीनां संक्रमणेन, रूढिवादिभिः स्थापितैः कठोरवचनैश्च समाजे नारीणां स्थितिः अहरहः शोचनीया जाता। वर्ग, लिङ्ग, वर्णादीनां विकटवैषम्येण वेदेषु मान्या ''वसुधैव कुटुम्बकम्'' इति समाजे समताया भावना विलुप्ता जाता। भेदभाव ग्रसितेऽस्मिन् समाजे विशेषेण नारी उपेक्षिता हृताधि-काराऽभवत्। सदैव लोके पुरुषाणां प्रभुता प्रतिष्ठिता जाता। पितुः सम्पदि, भर्तुः सम्पदि वा स्त्रीणां कोऽप्यधिकारो नासीत्। पुरुषाणां कृते बहुपत्नी-विवाहो मान्य आसीत् किन्तु नारीणां कृते विवाहबन्धनं आजीवनं अविच्छिन्नं बन्धनमस्ति। पाणिग्रहीता भवतु क्रूरो दुर्व्यसनग्रस्तो, रोगी, नपुंसको वा तेनैव सह जीवननिर्वाहो नारीणां परमो धर्मो मन्यते। विवाहशिविकायां स्थित्वा यस्य प्राङ्गणे पत्नीरूपेण प्रविष्टा सा नारी मरणोपरान्ते शववाहिकायां शयाना तस्य गृहात् निर्गन्तुं शक्ताऽस्ति। सर्वस्वरूपेषु सर्वास्ववस्थासु परिवारस्य कृते समर्पितानां नारीणां दीनां हीनां स्थितिं दृष्ट्वा राष्ट्रस्य प्रबुद्धः पुरोधा विधिवेत्ता डॉ. ''भीमराव अम्बेडकरः'' नारीणां समुन्नयनस्य दिशायां प्रयत्नशीलोऽभवत्। यद्यपि एकोनविंशत्याः शताब्द्या उत्तरार्द्धे अनेके समाजसुधारकाः स्वयंसेवीसंस्थाश्च नारीणां समुन्नत्यै चेष्टमाना आसन् किन्तु भारतीय संविधानस्य निर्माता डॉ. अम्बेडकरो महिलानां कृते संवैधानिक अधिकाराणां प्राप्त्यै महत्प्रयत्नं कृत-वान्। विधिविशेषज्ञः डा. अम्बेडकर ''हिन्दुकोड बिल'' माध्यमेन मूलाधिकारैर्वञ्चितानां नारीणां दीनां

**हीनां स्थितिं सुदृढीकर्तुं यथाशक्यं प्रायतत। तत्समये पूर्वं तु प्रधानमंत्रिणा जवाहरलाल नेहरू महोदयेनाऽपि ''नारीकल्याणकरस्य'''' हिन्दूकोड-बिलस्य'' समर्थने औत्सुक्यं प्रादर्शयत् किन्तु केषांचिद् रूढिवादिनां असहमत्या अस्य क्रियान्वयनं न जातम्। एवंभूतेऽपि अम्बेडकर महोदयस्य प्रयत्नोऽयं आन्दोलनरूपेण निखिले महाराष्ट्रप्रदेशे जनजागरणं कृतवान्। बम्बई, पूना, नासिकादिनगरेषु असंख्या नार्यो नारीमुक्ति आंदोलने महतीं भूमिकां निरवाहयन्। अम्बेडकर महोदयस्य पत्नी श्रीमती 'रंगाबाई' अपि आन्दोलनस्य सक्रिया कार्यकर्त्री आसीत्। आजीवनं मानवकल्याणकार्येषु संलग्नः समाजे समतायाः समर्थको बाबा भीमराव अम्बेडकरः 1958 तमे ख्रिस्ताब्दे दिवंगतः। आत्मनः सत्कार्यैः अयं महापुरुषः 1990 तमे ख्रिस्ताब्दे मरणोपरान्ते 'भारतरत्न' इति सर्वोच्च 'नागरिक' सम्मानेन सम्मानितो जातः। एतदतिरिक्तं पत्रपत्रिकासु, पुस्तकेषु च सारगर्भितलेखनेन, संगोष्ठीषु, सभासु कार्यस्थले च निष्पक्षभाषणेन, नीरक्षीरत्वात्मकेन निर्णयेन मानवहितचिन्तनेन सर्वत्र लब्धप्रतिष्ठोऽयं महापुरुषो लोकेस्मरणीयेषु अङ्गुलिगण्येषु सहस्रेषु एकोऽस्ति।**

## हिन्दी अनुवाद

''नारी राष्ट्र की निर्माणकर्त्री है'' प्रत्येक नागरिक उसकी गोद में पलकर बडा हुआ है। नारी जागरण के बिना राष्ट्र का विकास असम्भव है। महानगर बम्बई में समायोजित महिला सभा में लोककल्याण के लिए जन्म लेने वाले दलित, शोषित, अभाव ग्रस्त तथा मानवाधिकारो से वञ्चित प्राणियों के निःस्वार्थ डॉ. अम्बेडकर महोदय के द्वारा नारीसशक्तीकरण के प्रसंग में मुक्तकण्ठ से उद्घोषित उदारवचन युगयुगों तक मार्गदर्शक एवं प्रेरणादायक हैं। 14 अप्रैल 1891 में मध्यप्रदेश के एक निम्नकुल में उत्पन्न, अलौकिक प्रतिभासम्पन्न, विविधशास्त्रों में निष्णात अनेक भाषाओं के ज्ञाता, देशाटन से देशविदेशों की संस्कृति एवं संस्कारों सुपरिचित, महात्माबुद्ध, संतकबीर एवं ज्योतिबा फुले के समान संतों के जीवनदर्शन एवं चिन्तन से प्रबुद्ध डा. अम्बेडकर महोदय का नारीविषयक चिन्तन अतीत के परिप्रेक्ष्य में विचारणीय है। हमारे राष्ट्र में नारी वैदिककाल से ही सर्वत्र सम्माननीया तथा पुरुषों के समान सर्वाधिकार सम्पन्ना थी। घर, परिवार, समाज, शिक्षा संस्थान, संगीत, नृत्य चित्रादिकलाओं में सर्वत्र नारी का प्रवेश सुलभ था। वेदाध्ययन का अधिकार भी नारियों के लिए निषिद्ध नहीं था। गार्गी, मैत्रैयी, लोपामुद्रा, सुलभा सदृशी नारियाँ आज भी राष्ट्र का गौरव हैं। गुरुकुलो में भी अनेक ब्रह्मवादिनी नारियां अध्यापनकार्य में संलग्न थीं। धीरे-धीरे अब संस्कृतियों के संक्रमण से तथा रुढिवादियों के द्वारा स्थापित कठोर नियमों एवं बन्धनों से समाज में नारियों की स्थिति दिन पर दिन शोचनीया होती गई। वर्ग, लिङ्ग वर्ण आदि के विकट वैषम्य से वेदों में सम्मान्या 'वसुधैव कुटुम्बकम्' की भावना विलुप्त होने लगी। भेदभाव से ग्रसित इस समाज में विशेष रूप से नारी अपने अधिकारों से वञ्चित एवं उपेक्षित हो गई। पिता की सम्पत्ति में अथवा पति की सम्पत्ति में स्त्रियों का कोई अधिकार नहीं रहा। पुरुषों के लिए बहुपत्नी विवाह मान्य है किन्तु स्त्रियों के लिए यह बन्धन आजीवन अविच्छिन्न है। जीवनसाथी क्रूर हो, दुर्व्यसनों से संग्रस्त हो, रोगी हो अथवा नपुंसक हो उसके साथ जीवन निर्वाह

करना नारी का परम धर्म है। विवाह की डोली में बैठकर जिस घर में पत्नी रूप में नारी प्रवेश करती है, मरने के पश्चात् अर्थी पर सोती हुई उसके घर से निकलना ही नारी की नियति है। सभी रूप में सभी अवस्थाओं में परिवार के प्रति समर्पित नारी की दीनहीन दशा से द्रवित राष्ट्र के प्रबुद्ध पुरोधा 'डा. अम्बेडकर' नारियों के समुन्नयन के लिए प्रयत्नशील थे। यद्यपि 19 वीं शताब्दी के उत्तरार्द्ध में अनेक समाज सुधारक एवं समाजसेवा संस्थायें भी नारी की उन्नति के लिए प्रयत्नशील थी तथापि भारतीय संविधान के निर्माता डॉ. अम्बेडकर महोदय महिलाओं के लिए संवैधानिक अधिकारों की प्राप्ति के लिए सतत संघर्षशील थे। विधिविशेषज्ञ डॉ. अम्बेडकर ने 'हिन्दू कोड बिल' के माध्यम से अपने मूल अधिकारों से वञ्चित नारियों की दीन हीन दशा को सुदृढ़ करने के लिए पुरजोर प्रयत्न किया। उस समय प्रधानमंत्री पं. जवाहर लाल नेहरू ने भी हिन्दू कोड बिल के विषय में उत्सुकता प्रदर्शित की किन्तु कुछ रूढिवादियों की असहमति होने से इसका क्रियान्वयन सम्भव नहीं हुआ। तथापि अपने संकल्प से बद्ध डा. अम्बेडकर का यह प्रयत्न विशाल आन्दोलन के रूप में सम्पूर्ण महाराष्ट्र प्रदेश में नारी जागरण का मुक्ति मंत्र बन गया। बम्बई, पूना, नासिक आदि प्रमुख नगरों में असंख्य नारियों ने इस मुक्ति आन्दोलन में महती भूमिका का निर्वाह किया। डा. अम्बेडकर की पत्नी 'रंगाबाई' भी इस नारी मुक्ति आन्दोलन की सक्रिय सदस्या थी। आजीवन मानव कल्याण कार्यों में संलग्न, समाज में समता के समर्थक, बाबा भीमराव अम्बेडकर का 1958 ई. में निधन हो गया। अपने सत्कार्यों के लिए इनको 1990 ई. में मरने के पश्चात् 'भारत रत्न' सर्वोच्च नागरिक सम्मान से सम्मानित किया गया। इसके अतिरिक्त पत्र-पत्रिकाओं में तथा पुस्तकों में सारगर्भित लेखन, संगोष्ठी, सभा, तथा कार्य स्थल पर निष्पक्ष भाषण, विवादों में नीरक्षीरात्मक निर्णय तथा मानवहित चिन्तन से सर्वत्र प्रतिष्ठित यह महापुरुष लोक में स्मरणीय अंगुलि पर गिने जाने वाले हजारों में से एक है।

**पूर्व संस्कृतविभागाध्यक्षः**
**लालबहादुरशास्त्रीमहाविद्यालयः, जयपुरम्**
**दूरभाषः 0141-2621800**

---

**अनूदितकाव्यम्**

# मनुष्यः

**❑ प्रो. डॉ. मधुसूदनः म. व्यासः**

**संप्रत्यपि क्षितिजपारस्य तरलं तथ्यं मनुष्यः।**
**अत्र निकट-दूरस्थः सहजशब्दो मनुष्यः।।**
**विस्तृता मनोनदी अहर्निशं करोतु ध्वनिम्।**
**पूर्णनभोदृश्यं वा पूर्णः सूर्यः मनुष्यः।।**
**अभावसरः उच्छलति सदा नेत्रयोः।**
**तथापि कमलनामकः समग्रार्थोऽस्ति मनुष्यः।।**
**कदा नीरवश्वासे किञ्चिते प्रयतते प्रसारार्थम्।**
**सर्वाहङ्कारमात्रस्य परमस्पर्शः मनुष्यः।।**
**भूतकालिकक्षणाः पर्णवत् आन्दोलिताः सदैव।**
**अनागत-प्रकाशस्य चन्दनवृक्षो मनुष्यः।।**
**प्रसङ्गे प्रसङ्गे आन्दोलितानि दर्पाणि अहोरात्रम्।**
**मध्ये मध्ये तस्य स्मरण-स्वप्न अस्ति मनुष्यः।।**

**संस्कृताध्यक्षः,**
**विनयन महाविद्यालयः, शामलाजी-383355**
**मो.: 9427693554**

आयुर्वेद-स्तम्भः

# रसायनमिदं ब्राह्ममायुष्कामः प्रयोजयेत्

❑ प्रो. बनवारीलालगौडः
पूर्व-कुलपतिः

**महर्षिणा चरकेण भेषजं द्विविधं प्रोक्तम्, तद्यथा- 'स्वस्थस्योर्जस्करं किञ्चित्किञ्चिदार्तस्य रोगनुत्'। यद्धि भेषजं रसायनं प्रायो भवति तत्स्वस्थोर्जस्करमुच्यते, यद्बाहुल्येन आर्तस्य रोगहरणे समर्थं भवति तत्तु द्वितीयमार्तरोगहरं भेषजं भवति, तत्प्रायेण ज्वरादिशमनं भवति। अत्र ''प्रायः'' इत्यस्य प्रयोगो विशेषेण प्रयोजनवान् वर्तते, यतो हि कानिचिद्भेषजानि स्वानि स्वानि नियतानि कर्माणि तु कुर्वन्त्येव तैः सहैवापराण्यपि द्वितीयस्वरूपात्मकानि कर्माणि कुर्वन्ति।**

महर्षि चरक के द्वारा भेषज दो प्रकार की कही गई है, वह जैसे- कुछ स्वस्थोर्जस्कर अर्थात् स्वस्थ व्यक्ति की ऊर्जा को करने वाली (बढ़ाने वाली) औरकुछ रोगी के रोगनुत् होती हैं (रोगी के रोग को दूर करने वाली होती हैं)। जो भेषज प्रायः रसायनस्वरूप की होती है वह स्वस्थोर्जस्कर कही जाती है और जो बहुलता से रोगी के रोग के हरण में समर्थ होती है वह तो रोगी का रोग हरण करने वाली दूसरी भेषज होती है, वह प्रायः ज्वर इत्यादि रोगों का शमन करने वाली होती है। यहाँ पर प्रायः इस पद का प्रयोग विशेष रूप से प्रयोजन वाला है, क्योंकि निश्चित रूप से कुछ औषधियाँ अपने-अपने नियत कर्मों को तो करती ही हैं उनके साथ ही दूसरे प्रकार के कर्मों को भी करती हैं।

रसायनं वाजीकरणञ्च भेषजं प्रायः स्वस्थस्योर्जस्करं भवति, किन्तु भेषजनिर्माणप्रक्रियायां प्रयुक्तानां द्रव्याणां विशिष्टैर्गुणैः प्रभावेण वा रोग विशेषाणामपाकरण मपि करोत्येवमेव ''**आर्तस्य रोगनुद्**'' यद्भेषजं भवति तदपि प्राधान्येन तु रोगाणामपाकरणङ्करोति तथा विशिष्टद्रव्यै-र्विनिर्मितत्वाद्रसायनगुणानपि प्रकटीकरोतीत्यस्मादेव कारणादा-चार्येण कथितं यत्-

**स्वस्थस्योर्जस्करं यत्तु तद्वृष्यं तद्रसायनम्।।5।।**
**प्रायः, प्रायेण रोगाणां द्वितीयं प्रशमे मतम्।**
**प्रायः शब्दो विशेषार्थो ह्युभयं ह्युभयार्थकृतम्।।6।।**
(च.चि. 1/1/5-6)

रसायन एवं बाजीकरण भेषज प्रायः स्वस्थ व्यक्ति के लिए ऊर्जस्कर होती है किंतु इसके निर्माण की प्रक्रिया में प्रयुक्त द्रव्यों के विशिष्ट गुणों के द्वारा अथवा भेषज के प्रभाव से विशेष रोगों को दूर भी करती है। इसी प्रकार से रोगी के रोग को दूर करने वाली (आर्तस्य रोगनुद्) जो भेषज होती है वह भी प्रधान रूप से रोगों को दूर करती है तथा विशिष्ट द्रव्यों से निर्मित होने के कारण रसायनगुणों को भी प्रकट करती है, इसी कारण से आचार्य के द्वारा कहा गया है कि - जो औषध स्वस्थ व्यक्ति के लिए ऊर्जस्कर होती है वह तो प्राय वृष्य होती है तथा वह प्रायः रसायन होती है। द्वितीय (रोगहर भेषज) प्रायः अधिकांश रोगों को शान्त करने में मानी गई है। 'प्रायः' शब्द विशेष अर्थवाला है, निश्चित ही दोनों (दोनों प्रकार की भेषज) उभयार्थकारी होती हैं अर्थात् स्वस्थ के ऊर्जस्कर भेषज व्याधिहर भी होती है और व्याधिहर भेषज स्वस्थ के ऊर्जस्कर भी होती है।

**सर्वाणि रसायनभेषजानि न्यूनाधिकरूपेण शरीरे रोगप्रतिरोधकक्षमतोत्पादने समर्थानि भवन्ति, किन्तु**

**विशिष्टं रोगं प्रति प्रतिरोधकक्षमतोत्पादने तु विशिष्टान्येव रसायनभेषजानि समर्थानि भवन्त्यत एव ''प्रायः'' इत्यस्य पदस्य प्रयोगोऽत्र विहितः। एवमेव न हि सर्वाणि रोगनुद्भेषजानि रसायन-फलप्रदानि भवन्ति, किन्तु विशिष्टानि कानिचिद्रोग-नुद्भेषजानि किञ्चिद्रसायनकर्मकरणे समर्थानि भवन्त्यत एव प्रायः पदस्य प्रयोगो तत्रापि समुचितः, यथा हि-क्षतक्षीणोक्तो सर्पिर्गुडः रसायनपरकः वृष्यश्च भवति, तथा पाण्डुरोगोक्तो योगराजो रसायनत्वेनोक्तः, तथा कासाधिकारेऽगस्त्यहरीतकी रसायनत्वेनोक्तेत्याद्यनुसरणीयम्। अत्रोल्लेखनीयमेत द्वर्तते यद्व्याधिमात्रहरं न तद्रसायनं, किन्तु शरीर संयोगदार्ढ्याद्दीर्घायुः कर्तृत्वसाधारणधर्मयोगादुप चरितव्याधिहरं रसायनमिहोच्यत इति।**

सभी रसायनस्वरूप की औषधियाँ न्यूनाधिक रूप से शरीर में रोग प्रतिरोधक क्षमता के उत्पादन में भी समर्थ होती हैं किंतु विशिष्ट रोग के प्रति प्रतिरोधक क्षमता के उत्पादन में तो विशिष्ट रसायन स्वरूप की औषधियाँ ही समर्थ होती हैं, इसीलिए ''प्राय:'' पद का प्रयोग यहाँ किया गया है। इसी प्रकार से रोग को दूर करने वाली सभी प्रकार की औषधियाँ रसायन का फल प्रदान करने वाली नहीं होती हैं किंतु कुछ विशिष्ट रोगनाशक औषधियाँ कुछ रसायन कर्म करने में भी समर्थ होती हैं, इसलिए **प्रायः** पद का प्रयोग वहाँ पर भी उचित है, जैसा कि क्षतक्षीण चिकित्सा में कहा गया सर्पिर्गुड रसायन और वृष्य भी होता है तथा पांडुरोग में कहा गया योगराज भी रसायन के स्वरूप में कहा गया है एवं कास रोगाधिकार में भी अगस्त्यहरीतकी रसायनस्वरूप में कही गई है इत्यादि उपर्युक्त औषधियों के प्रभावात्मक कथन का अनुसरण करना चाहिए। यहाँ यह उल्लेखनीय है कि जो व्याधि का हरण करने वाली औषधि है वह रसायन नहीं है अर्थात् सभी औषधियाँ जो रोग को दूर करने वाली होती हैं वे रसायन नहीं होती हैं, किंतु शरीर से उन औषधियों का संयोग होने पर दृढ़ता, दीर्घायु करने जैसे साधारण धर्म को करने वाली होने के कारण व्याधिहरण करने वाली भेषज को भी रसायन यहाँ कहा गया है।

**ननु यदि स्वस्थोर्जस्करमपि व्याधिहरं, व्याधिहरं च स्वस्थोर्जस्करं तत्किं किञ्चिदिति पदेन भेषजकर्म व्यवस्थादर्शकेन क्रियते? ब्रूमः- बाहुल्येन स्वस्थोर्जस्करत्वं व्याधिहरत्वं च व्यवस्थाप्यते, न चेह सर्वार्तरोगहरस्य स्वस्थोर्जस्करत्वमिति प्रतिज्ञायते, येन पाठा सप्तपर्णादीनामपि रसायनत्वं साधनीय-शक्तित्वादार्त्तरोगहरत्वेन यदुच्यते तदपि रसायनं वाजीकणं च भवतीति लवमात्रोपदर्शनं क्रियते, तत्स्वस्थार्तयोरुभयार्थकर्तृत्वम्। प्रायः शब्दतात्पर्यं विवृणोति-प्राय इत्यादि। विशेषार्थ इति बाहुल्यार्थ इत्यर्थः।**

यहाँ व्याख्याकार चक्रपाणि स्पष्ट करते हैं कि-निश्चय ही यदि स्वस्थ की ऊर्जा को बढ़ाने वाली भी रसायनपरक भेषज भी व्याधिनाशक होती है और व्याधिनाशक भी स्वस्थ की ऊर्जा को बढ़ाने वाली होती है तो फिर चिकित्सा-कर्म की व्यवस्था के प्रदर्शक ''किंचित्'' इस पद का क्या प्रयोजन है? इस सम्बन्ध में व्याख्याकार कहते हैं कि अधिकता के आधार पर स्वस्थ की ऊर्जा को बढ़ाने वाली भेषज तथा व्याधि का हरण करने वाली भेषज हैं, इस तरह का व्यवस्थापन किया जाता है अर्थात् जिस किसी भी भेषज के द्वारा जो कार्य आधिक्येन होता है उसी के आधार पर उस भेषज का कर्म परक व्यव्यस्थापन (निर्धारण) किया जाता है और यहाँ सभी रोगियों के रोग की विनाशक भेषज की स्वस्थोर्जस्करता की उद्घोषणा नहीं की जा रही है,

जिससे पाठा, सप्तपर्ण इत्यादि द्रव्यों की भी रसायनता को साधनीया शक्ति होने से रोगी के रोगनाशक के रूप में जो कथन किया जाता है, वह भी रसायन एवं वाजीकरण होता है। वह स्वल्प मात्र प्रदर्शन किया जाता है, वह स्वस्थ एवं रोगी इन दोनों के फल का कारक होता है। 'प्रायः' शब्द के तात्पर्य की व्याख्या करते हैं- प्राय इत्यादि। 'विशेषार्थ' इस वचन का तात्पर्य है 'बाहुल्यार्थ' अर्थात् जहाँ जिस रूप में बहुलता से (अधिकता से) प्रयुक्त किया जाता है वह विशेषार्थ स्वरूपक है।

**अत एवायुर्वेदस्य सिद्धान्तमेनमुररीकृत्य यथा समयं नियतानां रसायनभेषजानां सेवनङ्करणीयं भिषङ्निर्देशेन। भिषजोऽपि यदा पुरुषं पुरुषं वीक्ष्य देशकालानुसारिणां रसायनवाजीकरणभेषजानां विधिपूर्वकमेव प्रयोगङ्कुर्वन्ति तदैव समुचितं फलं प्रापयन्त्यातुरेभ्यः। महर्षिणा प्रयोगविधिस्तु द्विविधः प्रोक्तः-**

**रसायनानां द्विविधं प्रयोगमृषयो विदुः।**
**कुटीप्रावेशिकं चैव वातातपिकमेव च।।**
**( चरकसंहिता )**

इसलिए आयुर्वेद के इस सिद्धांत को स्वीकृत करके यथा समय नियत रसायन स्वरूपक औषधियों का सेवन चिकित्सक के निर्देश से करना चाहिए। चिकित्सक भी जब प्रत्येक पुरुष को देखकर देश और काल के अनुसार रसायन और वाजीकरण की औषधियों का विधिपूर्वक ही प्रयोग करते हैं तभी रोगियों के लिए समुचित फल प्राप्त करवाते हैं। महर्षि तो रसायन-योगों (एवं वाजीकरण-योगों) के दो प्रकार के प्रयोग को जानते हैं अर्थात् उन्होंने दो प्रकार के प्रयोग को कहा है- कुटीप्रावेशिक तथा वातातपिक।

**अनयोः प्रकारयोः विश्लेषणं तु कृतं व्याख्याकारेण चक्रपाणिना, यथा-**

**कुटीप्रवेशेन यत्क्रियते तत्कुटीप्रावेशिकम्।**
**वातातपसेवया च यत्क्रियते तद्वातातपिकम्।।**

**कुटीप्रावेशिके तु बह्वितिकर्तव्यतापूर्वकमेव रसायनवाजीकरणभेषजसेवनं भवत्यन्यथा समुचितफलावाप्तिर्न भवति, कदाचिच्च भल्लातक-शुण्ठी-पिप्पल्याद्युग्रवीर्यात्मकानां सद्य एव शुभाशुभफलप्रदानां द्रव्याणामविधिना सेवने-नोपद्रवा अपि जायन्ते, अत एव भिषङ्निर्देशं विना रसायनद्रव्याणां सेवनं कुटीप्रावेशिकविधिना न करणीयम्। वातातपिकविधौ तूपद्रवाणां समुत्पत्तिः सामान्येन न भवत्यत एवानेन विधिना रसायन-वाजीकरणभेषजानां प्रयोगः करणीयस्तत्रापि च भिषङ्निर्देशः समुचित एव।**

दोनों प्रकारों का विश्लेषण तो व्याख्याकार चक्रपाणि के द्वारा किया गया है, जैसे-कुटी में प्रवेश करने से जो (रसायन सेवन) किया जाता है वह कुटीप्रावेशिक कहलाता है। वायु और धूप का सेवन करते हुए भी जो रसायन सेवन किया जाता है वह वातातपिक कहलाता है। कुटी प्रवेश इस विधि में तो अनेक प्रकार की प्रक्रियाओं को पूरा करके ही रसायन-वाजीकरण की औषधियों का सेवन होता है अन्यथा समुचित फल की प्राप्ति नहीं होती है। और कभी-कभी भल्लातक, शुण्ठी, पिप्पली इत्यादि उग्र वीर्य वाले तत्काल ही शुभ एवं अशुभ फल देने वाले द्रव्यों का विधि रहित स्वरूप से सेवन किया जाए तो उपद्रव भी उत्पन्न हो जाते हैं। इसलिए चिकित्सक के निर्देश के विना रसायन द्रव्यों का सेवन कुटीप्रावेशिक विधि से नहीं करना चाहिए। वातातपिक विधि में तो उपद्रवों की समुत्पत्ति सामान्यतया नहीं होती है, इसलिए इस विधि से रसायन और वाजीकरण औषधियों का प्रयोग करना चाहिए, लेकिन इसमें भी चिकित्सक का निर्देश उचित ही होता है।

**आयुर्वेदे तु बहूनि सौम्यस्वरूपात्मकानि रसायनवाजीकरणभेषजान्यपि सन्ति यानि हि वातातपिकविधिना सेव्यमानानि शुभफलप्रदानि भवन्ति, च्यवनप्राशः ब्राह्मरसायनञ्च रसायनात्मकेषु सौम्येषु योगेष्वन्यतमौ योगौ वर्तेते। यद्यपि कस्मिंश्चिदपि काले प्रयोगयोग्यावेतौ योगौ, तर्ह्यपि शीते तु च्यवनप्राशः ग्रीष्मे च पुनः ब्राह्मरसायनस्य प्रयोगः सर्वोत्कृष्टो वर्तते।**

आयुर्वेद में तो सौम्य स्वरूप की अनेक रसायन और वाजीकरण की औषधियाँ हैं जो कि वातातपिक विधि से सेवन की जाती हुई शुभ फल प्रदान करने वाली होती हैं। च्यवनप्राश और ब्राह्मरसायन रसायन स्वरूप वाले सौम्यस्वरूपक योगों में श्रेष्ठ योग हैं। यद्यपि किसी भी समय में प्रयोग के योग्य ये दोनों योग हैं फिर भी शीतकाल में च्यवनप्राश और ग्रीष्म काल में ब्राह्मरसायन का प्रयोग सर्वोत्कृष्ट होता है।

**यद्यपि शरीरे रोगप्रतिरोधकक्षमताभिवर्धनार्थं यथोचितं कालमुपयुक्तञ्च जनमभिलक्ष्योचितमेव रसायनयोगं विचिन्वन्ति भिषजः, तर्ह्यपि साधारणेष्वृतुषु वसन्तप्रावृट्शरत्सु ब्राह्मरसायनं शिवं सर्वोत्कृष्टञ्च मन्यन्ते भिषजः। आयुर्वेदे तु संवत्सरात्मकः कालस्तत्तल्लक्षणं तत्तत्कार्यञ्चाभिसमीक्ष्यायनभेदेन द्विधाऽपि प्रविभज्यते। अत्र खलु तावत्षोढा प्रविभज्य ऋतव उपदिष्टाः, यथा- हेमन्तो ग्रीष्मो वर्षाश्चेति शीतोष्णवर्षलक्षणास्त्रय ऋतवो भवन्ति, तेषामन्तरेष्वितरे साधारणलक्षणास्त्रय ऋतवः प्रावृट्शरद्वसन्ता इति। प्रावृडिति प्रथमः प्रवृष्टः कालः, तस्यानुबन्धोहि वर्षाः। एवमेते षट्विभज्यन्ते ऋतवः।**

यद्यपि शरीर में रोग प्रतिरोधक क्षमता के अभिवर्धन के लिए यथोचित काल एवं उपयुक्त व्यक्ति को देखकर उपयुक्त ही रसायन योग को चिकित्सक चुनते हैं, फिर भी वैद्यगण साधारण ऋतुओं वसंत, प्रावृट् एवं शरद् में ब्राह्म रसायन को कल्याणकारी और सर्वोत्कृष्ट मानते हैं। आयुर्वेद में तो संवत्सरात्मक काल और उसके लक्षण तथा उसकाल के कार्य को अच्छी प्रकार से देख कर अयन भेदसे दो प्रकार (दक्षिणायन एवं उत्तरायण से) से भी विभक्त किया जाता है। यहाँ तो छः प्रकार से संवत्सर को विभक्त करके छः ऋतुयें उपदिष्ट हैं- हेमन्त, ग्रीष्म और वर्षा ये शीत, उष्ण एवं वर्षा के लक्षणों वाली तीन ऋतुयें होती हैं। उन ऋतुओं के (उन तीनों के) बीच में दूसरी साधारण लक्षणों वाली तीन ऋतुयें प्रावृट्, शरद् एवं वसन्त ऋतु होती हैं। **प्रावृट्** का तात्पर्य है ''पहली वर्षा का समय'', उसके अनुबंध में ही (बाद में आने वाली) वर्षा ऋतु होती है, इस प्रकार से ये छः ऋतुयें विभक्त की जाती हैं।

**एतेषु सर्वेष्वेव ऋतुषु ब्राह्मरसायनसेवन-मुत्कृष्टम्भवति, पुनरपि साधारणलक्षणा हि मन्द-शीतोष्णवर्षत्वात्सुखतमाश्च भवन्तिवसन्तप्रावृट् शरदः, अतएव निरापदम्भवति ब्राह्मरसायनसेवन मेतेष्वृतुषु। ग्रीष्मे तु पुनर्भृशोष्णोपहतत्वाच्छरीर-मसुखोपपन्नं भवत्युष्णवातातपाध्मा तमतिशिथिल मत्यर्थप्रविलीनदोषं पुनरपि ब्राह्मरसायने प्रभूता-न्यामलकफलानि भवन्ति तथा श्वदंष्ट्रा-बिल्वाग्नि-मन्थ-पुनर्नवा-मुद्गपर्णी-माषपर्णी-शालपर्णी-पृश्निपर्णी-बला-जीवकर्षभक-जीवन्ती-शतावरीत्यादिभिर्द्रव्यैः सह शरेक्षुदर्भकाशानां शालीनां मूलस्यापि प्रयोगो भवत्यस्मात्कारणा-द्गीष्मेऽप्युपयोगि भवतीदं ब्राह्मरसायनम्।**

इन सभी ऋतुओं में ब्राह्म रसायन का सेवन उत्कृष्ट होता है, फिर भी साधारण लक्षणों वाली मन्दशीत, मन्द उष्ण एवं मन्द वर्षा वाली होने के कारण वसंत, शरद् एवं

प्रावृट् ऋतुयें सुखतम होती हैं। इसलिए ब्राह्म रसायन का सेवन इन ऋतुओं में निरापद होता है। ग्रीष्म ऋतु में तो अत्यधिक गर्मी से पीड़ित होने के कारण शरीर असुखी होता है, अत्यधिक उष्ण वायु एवं आतप से आध्मात (प्रभावित, पीडित, परिपूर्ण) होने के कारण शरीर अत्यधिक शिथिल हो जाता है और अत्यंत लीन दोष वाला हो जाता है, फिर भी ब्राह्म रसायन में आंवली पर्याप्त मात्रा में होते हैं, तथा गोखरु-अग्निमन्थ (अरणी)-पुनर्नवा-मुद्गपर्णी-माषपर्णी-शालपर्णी-पृश्निपर्णी-बला-जीवनकर्षभक-जीवन्ती-शतावरी इत्यादि द्रव्यों के साथ शर, इक्षु, दर्भ (डाभ), काश इन सब के मूल एवं शालि चावल के मूल का भी प्रयोग होता है, इस कारण से ग्रीष्म में भी यह ब्राह्म रसायन उपयोगी है।

**अत एव रसायनमिदं ब्राह्ममायुष्कामः वसन्त-ग्रीष्मवर्षासु शरत्काले चापि प्रयोजयेत्, एवं कुर्वन् प्रयोक्ता सः दीर्घमायुर्वयश्चाग्र्यं कामाँश्चेष्टान् समश्नुते। ब्रह्मरसायनस्य सेवनेन नादीर्घमायुः स्मृतिं मेधामारोग्यं तरुणं वयः प्रभावर्णस्वरौदार्यं परमञ्च देहेन्द्रियबलं प्राप्नोति तथा वाक्सिद्धिं प्रणतिं कान्तिं चापि लभते। वाक्सिद्धिरित्यस्य तात्पर्यमिदमस्ति यत् सः यदुच्यतेतदवश्यं भवतीत्यर्थः, प्रणतिस्तु लोकवन्द्यता। एते कर्मणी तु शीलाचरणेन स्वस्थेन चाकर्षकेण तेजोमयशरीरेण सम्भवतः, जनाः मेधाविनस्तस्यादरङ्कुर्वन्त्यत एवाज्ञापालनं प्रणति-त्वमपि च कुर्वन्ति। ब्राह्मरसायनस्य सेवनेन रोगप्रतिरोधकक्षमताया अभिवर्धनम्भवत्यत एवास्य प्रयोगः करणीयः।**

इसलिए यह ब्राह्म रसायन आयु की कामना करने वाला व्यक्ति वसन्त, ग्रीष्म, वर्षा में एवं शरद् ऋतु में भी प्रयुक्त करे। इस प्रकार से प्रयोग करने वाला वह व्यक्ति दीर्घायु, श्रेष्ठ वय (युवावस्था) तथा अभीष्ट इच्छाओं का उपयोग करता है। मनुष्य ब्राह्म रसायन के सेवन से दीर्घ आयु, स्मृति, मेधा (धारणा शक्ति), आरोग्य, तरुण, वय, प्रभा, वर्ण, श्रेष्ठ स्वर, उदारता (स्वर में भी एवं कर्मों में भी उदारता), देह एवं इन्द्रियों का अत्यधिक बल प्राप्त करता है तथा वाणी की सिद्धि, प्रणति (लोगों के द्वारा वंदना किए जाने वाले स्वरूप) को तथा कांति को भी प्राप्त करता है। ''वाक्सिद्धि'' का तात्पर्य यह है कि वह जो कहता है वह अवश्य होता है, प्रणति तो लोकवन्द्यता को कहते हैं। ये दोनों कर्म तो उस व्यक्ति के शीलस्वरूपक आचरण से एवं स्वस्थ तथा आकर्षक तेजोमय शरीर के कारण संभव होते हैं, लोग बुद्धिमान् उस व्यक्ति का आदर करते हैं, इसलिए आज्ञापालन और प्रणाम भी करते हैं। ब्राह्म रसायन के सेवन से रोग प्रतिरोधक क्षमता का अभिवर्धन होता है अत एव इस का प्रयोग करना चाहिए।

**प्राचीनकाले महर्षयश्चात्यन्तनिष्ठया ब्राह्म-रसायनमिदं प्राश्यामितायुषो बभुवुः, ते तपोधनाः वीततन्द्राक्लमश्वासा निरातङ्का समाहिताः मेधा-स्मृतिबलोपेताश्चिररात्रं ब्राह्मं तपो ब्रह्मचर्यं च चेरुः (चर गतौ धातुप्रयोगश्चात्र लिट् लकारे)।**

प्राचीन काल में महर्षि अत्यन्त निष्ठापूर्वक इस ब्राह्म रसायन को चाट कर (प्रयोग कर) के अमित आयु वाले हुए। तपोधन (तप ही है धन जिनका ऐसे) तन्द्रा-क्लम-श्वास रोग से रहित होकर सावधान वे महर्षि मेधा (धारणा शक्ति), स्मृति (स्मरण शक्ति) और शारीरिक बल से एवं मानसिक बल से युक्त होकर अधिक समय तक ब्राह्म (ब्रह्मसम्बन्धी) तप को तथा ब्रह्मचर्य को प्राप्त करते रहे।

**८०, सेनापति हाउस के पीछे**
**प्रेमनगरम्, झोटवाड़ा, जयपुरम्**

प्रेषण–प्रत्येक माह की ५ तारीख सी.एस.ओ. गांधीनगर, जयपुर
पंजीयन क्रमांक (भारत) आर. एन. आई. ३७५८–५७

डाक पंजीयन
Jaipur City/405/2021-23

हार्दिक शुभकामनाओं सहित :-

निर्माता

ए इन्फ्रास्ट्रक्चर लिमिटेड

एस्बेस्टोस सीमेन्ट पाइप्स

सस्ता, मजबूत एवं टिकाऊ

सर्वोत्तम 'माजा' तकनीक द्वारा निर्मित पेयजल, कृषि, बोरवैल, सीवरेज
एवं ड्रेनेज में उपयोगी तथा धातु निर्मित पाइपों की अपेक्षा सस्ते और टिकाऊ

एवं

निर्माता

एस्बेस्टोस सीमेन्ट शीट्स

छत एक, लाभ अनेक

उच्च गुणवत्ता की फाइबर सीमेन्ट की नालीदार चादरें

कारखाना : हमीरगढ़ - 311025, जिला भीलवाड़ा (राजस्थान) दूरभाषः 01482-286102-07
दिल्ली कार्यालय : ए-9ए, ग्रीन पार्क मैन, नई दिल्ली-110016 दूरभाषः- 011-26961849/26965673
जयपुर कार्यालय : 411, तीसरी मंजिल, शालीमार काम्प्लेक्स, चर्च रोड, जयपुर-302001 फोनः 0141-4019691/2370566
ईमेल आईडी : jaipur@kanoria.org (Pipe Dn.), sharma.ashok@kanoria.org (Sheet Dn.)

राष्ट्रीय विचारों के लिए पढ़ें

(हिन्दी) साप्ताहिक
पाञ्चजन्य

हमारी विशेषताएं

(English) Weekly
ORGANISER



- राष्ट्रीय दृष्टिकोण
- 7 दशकों से लगातार प्रकाशित
- संसद तथा विधानसभाओं को गुंजायमान करने वाली पत्रिकाएं
- विश्वसनीय, प्रतिष्ठित, दायित्वपूर्ण पत्रकारिता
- हजारों शैक्षिक, व्यावसायिक प्रतिष्ठानों एवं पुस्तकालयों में पहुंच
- ई-पेपर की सुविधा



You can subscribe Panchjanya/Organiser Weeklies online through our
Websites: www.panchjanya.com, www.organiser.org

वार्षिक ग्राहक शुल्क

भारत में ₹ 700/- पाञ्चजन्य ₹ 800/- ORGANISER (साधारण डाक द्वारा)
विदेशों में $ 80 (विदेशों में हवाई डाक द्वारा)

प्रसार विभाग
भारत प्रकाशन (दिल्ली) लिमिटेड
2322, संस्कृति भवन, लक्ष्मी नारायण गली, पहाड़गंज, नई दिल्ली- 110055
फोन : 011-47642000,01,02, ई-मेलः circ@bpdl.in

स्वत्वाधिकारी–भारतीयसंस्कृतप्रचारसंस्थानम्, राजस्थानम् अध्यक्षः शंकरप्रसादशुक्लः प्रकाशको मुद्रकश्च माणकचन्द माहेश्वरी द्वारा न्यू जय शिवा प्रिन्टर्स, गोपालबाड़ी, जयपुरम् दूरभाषः २३६५७२१ पत्रसंकेतः– भारतीभवनम्, बी–15, न्यू कॉलोनी, जयपुरम्–३०२००१ • दूरभाषः ०१४१–२३७९०१४

प्रतिष्ठायाम्,